CC-0. In Public Domain. Digitization by eGangotri

श्रीराष्ट्रिय अभिलेखालय
नेपाल
विषयः शैवतन्त्रम्
पुस्तक नामः परातन्त्रम्
क्र. सं. ञ २५८
वि. सं. ७८(ख)
पत्र सं: २९
आकार २८ × ८

NATONAL ARCHIVES
NEPAL
Subject:
Manuscript-Name:
C. No.
S. No.
Folio. No
Size.

Short Title Parātantra

NEPAL-GERMAN MANUSCRIPT PRESERVATION PROJECT
National Archives, Kathmandu, Nepal.

Manuscript No. 3-254 विषय नं. Śaivatantra 246 kh

4. Catalogue (बृहत् संक्षिप्त सूचिपत्रम्) vol. 4, No. p. 239

TITLE:

Parātantra (मा. ग)

No. of leaves: 29 Size in cm: 28 X 9. Reel No. A-167/10

Date of filming: 17. 10. 71

Remarks: paper, devanāg.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्रीराष्ट्रिय अभिलेखालय
नेपाल

विषयः शैवतन्त्रम्
पुस्तक नामः परातन्त्रम्
क्र. सं. न २५४
वि. सं. ७८(ख)
पत्र सं: २९
आकार २८ × ८

NATONAL ARCHIVES
NEPAL

Subject:
Manuscript-Name:
C. No.
S. No.
Folio. No
Size.

Short Title Parā-tantra

NEPAL-GERMAN MANUSCRIPT PRESERVATION PROJECT
National Archives, Kathmandu, Nepal.

Manuscript No. 3-254 विषय नं. Śaivatantra 246 kh

4. Catalogue (बृहत् संक्षिप्त सूचिपत्रम्) vol. 4,1 No. p. 239

TITLE:

Parā-tantra (मा.ग)

No. of leaves: 29 Size in cm: 28 X 9. Reel No. A-167/10

Date of filming: 17.10.71

Remarks: paper, devanāg.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ नमः श्रीपरदेवतायै ॥ वक्रसिद्धिसमाकीर्णे श्मशाने करवीरके । तत्र वीरगणाः सर्वे महाकल्लोलकुक्कुटे ॥ निवर्त्तिते महा
चक्रे यागे त्रिदशडामरे ॥ महाधून्दमहास्फाल… गणोडोकिणीभाविते ॥ ब्रह्माद्या याम तस्यास्ते क्षेत्रेशो भैरवादयः ॥ गणेशो व
टुकाः सिद्धा मातृचक्रे तु भैरवः ॥ श्रीनाथादिगणाः सर्वे वीरनाथाव नाशिते ॥ सिद्धिनाथावकाशेन संतोषितकुलेश्वरः ॥
सर्वभूषां परित्यज्य सानन्दोल्लासिमानसः ॥ समरस्य स्थितं देवं पृच्छते कुलसुन्दरी ॥ ॥ श्रीदेव्युवाच ॥ सर्वज्ञोऽसि ॥एम॥
वज्ञानं त्वत्प्रसादाच्छ्रुतं मया । जामलाष्टकपूर्वं तु तन्त्राण्येकविधानि च ॥ शिरश्छेदश्च वकुधा महामन्थानसंज्ञकं । प ॥१॥
रा तन्त्रं च विज्ञाः सागराख्यामहामतं ॥ चतुर्विंशति वेतालाः कृताः सर्वेश्वधारिता ॥ इदानीं शंसयोजानं त्वं देव वंना ख२
थ ॥ एकाक्षी पूर्णमाशक्तिर्द्वितीया परमेश्वरी ॥ एका शक्तिर्महामाया विश्वं व्याप्य व्यवस्थिता ॥ नादिमध्यान्तवर्जिता
स्तु यया सर्वं प्रवर्त्तते ॥ त्वयोक्ता नादिनी या सा तन्त्रे कुलमहार्णवे ॥ एषा संधार्य्यते विश्वं मे कान्ते लोकपूजिता ॥ एत

ऐका मा परमा कथं चाभिन्ना वाप्यभिन्ना वे वद देव जगत्पते ॥ कथमेका परा शक्तिर्विभिन्ना परमेश्वरी ॥ षट्सिंहासनगा देवी नायिका षट्प्रकीर्त्तिता ॥ षडाम्नायाविभिन्ना वे त×१

देववर्ग्गा ब्राह्मी षडाम्नाय कथं प्रभो ॥ षट्सिंहासनगा प्रोक्ता देव्यः षण्नायिकाः स्मृता ॥ षडाम्नाय विभिन्ना च वैं किं संज्ञा भेद
नामतः ॥ पूर्वसिंहासना देवी याम्यसिंहासनाश्रिता ॥ सिंहासना पश्चिमगा सौम्यसिंहासना परा ॥ ऊर्ध्वगता सिंहासना
अधःसिंहासना तथा ॥ षट्सिंहासनसंस्थाता षडाम्नायेति कीर्त्तिता ॥ कथं सिंहासनं ज्ञानं स्थिता स्वाम्नाय देवता
॥ तन्त्रे वामामले वापि चतुर्विंशतिलक्षके ॥ ग्रन्थे त्वया सूचिता वै षडाम्नाय विशेषतः ॥ एषा परा विभिन्ना किं षट्सिंहासनमा
श्रिता ॥ आद्या शक्तिः परा चैका कथं षट्छक्तितां गता ॥ या माद्या प्रकृतिः सूक्ष्मा चितिरूपेण संस्थिता ॥ विन्दुमालिनिरूपा सा स
र्वव्याप्य व्यवस्थिता ॥ पतन्ती भवती शंका निर्मितु परमेश्वरी ॥ हृदयग्रन्थि सुदृढं सर्वज्ञ परमेश्वर ॥ अथैका परमा शक्ति
राद्या प्रकृतिरीश्वरी ॥ किमर्थं कस्य रक्षार्थं षडाम्नायाः प्रकीर्त्तिताः ॥ त्रैलोक्यरक्षणार्थाय समयापालनाय वा ॥ साध
केभ्यो र्थ्यते वापि वदस्व परमेश्वर ॥ ॥ श्रीसदाशिव उवाच ॥ अयि प्रियतमे वापि निशामय वदामि ते ॥ गुह्याद्गुह्यतमं दिव्यं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मकथं कथयामि ते ॥ तवस्नेहात्प्रवक्ष्यामि रहस्यं कौलिकान्वयं ॥ नमस्कृत्य प्रवक्ष्यामि विष्णुमायां जगन्मयीं ॥ नारायणीं
महामायां प्रकृतिं विश्वरूपिणीं ॥ एका परापरा शक्तिः रहस्यं कौलिकान्वयं ॥ नमस्कृत्य प्रवक्ष्यामि विष्णुमायां जगन्मः
यीं ॥ नारायणीं महामायां प्रकृतिं विश्वरूपिणीं ॥ एका परापरा शक्तिः प्रकृतिर्विश्वमोहिनी ॥ विश्वं विमोहनात्सा च वै
ष्णवीति प्रकीर्त्तिता ॥ धारणीं धात्रीमित्याहुः पालनात्परमेश्वरी ॥ त्रैलोक्यमोहनान्माया स्वात्मा सा प्रकृतिः स्मृता ॥ ॥शमः॥
विश्वसंधारणात्सा तु वैष्णवीति प्रकीर्त्तिता ॥ केवल्यफलदानेन्त्या मान्या नारायणी स्मृता ॥ ब्रह्मरोपि वशे यस्याः स ॥२॥
न्नबद्धः सकृन्नवत् ॥ यां विना परमेशोपि शव इत्यभिधीयते ॥ स्पन्दते नैव शक्नोति विना तां परमेश्वरः ॥ हीशो यन्नीशतां
याति प्रकृत्या लोकनं विना ॥ दारुश्चैव यथा वह्निः मंथनात्संप्रकाशते ॥ मायासंप्रगृहीतो वै सृष्टिस्थित्यन्तकृद्भवेत् ॥ जीवस्
तो यथा देहः स्पन्दितुं नैव शक्यते ॥ शववत्कर्महीनत्वात्समाधिः संस्थितः प्रिये ॥ मायाविरहिता काले निशाकालेति गीयते ॥

शववत्तिष्ठते देवि विष्णुमाया विसंग्रहात् ॥ मायया कवलीकृत्वा शिव इत्यभिधीयते ॥ शिवशक्तिसमायोगात्सर्वं जगदिदं भवे
त् ॥ शक्तिरूपेण सा माया विश्वं व्याप्य व्यवस्थिता ॥ स्वयं सदाशिवो देवो विष्णुप्रकृतिरुच्यते ॥ उभयोर्मेलनाद्देवि शिवशक्ती
ति गीयते ॥ प्रवर्त्तनाय सर्वेषां संसारचक्रभ्रान्तवत् ॥ त्वन्तु देवि विष्णुमायाः नारायणीं जगन्मयी ॥ देवस्यानन्दरूपोहं जातेः
स्वयं सदाशिवः ॥ एवं न वर्त्तये देवा वृषो हरिहरात्मको ॥ सृष्टिस्थितिश्च संहारः कल्पे कल्पे कथं भवेत् ॥ शिवशक्त्यात्मकं विश्वं
पश्ये देवि नवचक्षुषा ॥ न पुंस्त्वं स्त्री न वज्राक्षी न चक्राङ्कीयतः प्रजाः ॥ लिङ्गाङ्की च भगाङ्की च तेन माहेश्वरी प्रजा ॥ यया सृष्टं
सृजद्वेधाः साधनात्पालयते हरिः ॥ संहर्त्ता हरते रुद्रः सर्वे नन्दन्तु गाः सुराः ॥ एकास्या परमा देवि विश्वं व्याप्य व्यवस्थिता ॥ चतुर्धि
शक्तितत्त्वेन ब्रह्माण्डं चेतयन्ति च ॥ पृथिवी वायुराकाशं जलवह्निमयं वपुः ॥ धृत्वा संसृज्यते विश्वं कल्पे कल्पे यथेच्छया ॥
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ पंचभूतात्मकं चैव शरीरं पंचसंस्कृतं ॥ एकीकृत्य तथा पञ्च भूतरूपेण संस्थिता ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

नी ३

निर्जीवाजीवरूपेण पञ्चभूतत्वमागता ॥ सिंहासनमहाम्नायः पञ्चभूतानि संगमः ॥ आद्या सा परमा शक्तिः योनिस्था
कुलरक्षिणी ॥ ब्रह्माण्डव्यापिनी नित्या परं ब्रह्मस्वरूपिणी ॥ चतुर्विंशतिभिस्तत्त्वैः सर्वजीवस्वरूपिणी ॥ ब्रह्मस्वरूपिणी साक्षात्स्त्री
पुंभेदो न विद्यते ॥ लीलया क्रीडते नित्या लक्ष्मीरूपधारिणी ॥ अरूपा रूपवान्भूत्वा पुंरूपं धार्यते शिवा ॥ कदाचिज्जीलया दे र
वी मायारूपेण क्रीडति ॥ कदाचिद्धरिरूपेण शिवरूपेण स्वेच्छया ॥ ब्रह्मरूपधरा माया स्वेच्छारूपधरा परा ॥ एषा परापरा ॥ राम ॥
देवी प्रकृतिर्विश्वमोहिनी ॥ प्रवर्त्तयति संसारं समयी पालनाय च ॥ श्रीनाथ क्रमसिध्यर्थं षडाम्नायत्वमागता ॥ षट् ॥३॥
सिंहासनगा देवीः समासात्कथयामि ते ॥ पुरा नन्दवने देवि निर्जने पशुवर्जिते ॥ सदाशिवोहं षड्वक्त्रः समाधिध्यानमाश्रि
ता ॥ त्वन्तु कापालिनी भूत्वा मामपृच्छत्षडाननं ॥ प्रथमं पूर्ववक्त्रेण रूपं तत्पुरुषेण च ॥ कथयामास प्राचीतु सिंहासन
मनोर्द्धतः ॥ नायिका रुद्रशक्तिर्या शिवं तत्पुरुषं परं ॥ घूर्णेश्वरी महोग्रा सा पूर्वाम्नायप्रकीर्त्तिता ॥ चक्रेश्वरीन्तु वेद्या

संस्थितौ ४

मि साधकानां हिताय वै ॥ ध्यानन्तु चिन्तयेत्तस्याः ध्यानं च परमेश्वरि ॥ इन्द्रनीलसमप्रख्या दशदोर्दण्डमण्डिता ॥ वराभ
यकरं रम्यं सत्रिशूलकपालकं ॥ डमरुं चाक्षमालां च शक्तिं चैव कराम्बुजे ॥ इक्षुचापं शरं चैव खड्गं हस्ते सुशोभनी ॥
महाप्रेतोपरिगता सूर्यचन्द्रासनस्थिता ॥ प्रत्यालीढा त्रिनेत्रा च मुण्डमालाविभूषिता ॥ वासुकीशंखपालौ तौ कर्ण
भूषणतां गतौ ॥ अनन्तहारमाला च हाडालंकारभूषिता ॥ विशालत्र्यनेत्रा च चन्द्रार्द्धकृतभूषणा ॥ एषा घूर्णेश्व
री देवी हरावरवप्रिया ॥ घूर्णेश्वरीति विख्याता सा हुंकाररजोयुता ॥ गिरौ पुण्यालये पीठे लक्ष्मीवनश्मशानके ॥ इत्ये
ग्णाधिता नित्या बहुरूपावतारिता ॥ पूर्वाम्नायेति विख्याता पूर्वदेवर्षिपूजिता ॥ ईश्वरीसर्वभूतानां महाज्ञान्यः
नशेवरा ॥ नानारूपधरा नित्या बहुरूपावतारिणी ॥ जया जयन्ती विजया अजिता नारसिंहिका ॥ व्याघ्रेश्वरी करालाच
राजेश्वरी भुवनेश्वरी ॥ रक्तदन्ता विशालाक्षी कामेश्वरी चण्डमालिनी ॥ चिमुञ्जिका डामरेश्वरी नाटेश्वरी नृत्यनायिका ॥ नन्दी

॥५

CC-0. In Public Domain. Digitization by eGangotri

वैवमहाकाल·नृत्ङ्गिनीचकुल्लालिका॥नवनाटेश्वरीतत्र·चतुर्पंचरसान्विता॥वटुभेदादेवदेवी·भैरवाष्टकमातृका॥ना
टेश्वरीति विख्याता·भैरवाश्चक्रपालकाः॥दोचैवविघ्नेशो वटुक·योगिनीमातृकाष्टकाः॥बुलामामाथाः प्रपूज्यन्ते·कुमारीकाम
दासदा॥नृत्यमाने पुरादेवी·भैरवो मातृभिर्वृतः॥नृत्यभैरवनामा तु·पूर्वचक्रे व्यवस्थिता॥गणेशक्षेत्रडाकिण्या·गणास्तत्रः
सुरसाध्विताः॥वाममार्गे समाराध्य·नत्त दक्षिनःक्रिया॥स्नक्षदीपे कुशदीपे·वटुधावनदृच्चगा।वश्याकर्षस्तम्भ ॥श्रीमः॥
नत्र·सिद्धयस्तत्रगिमादयः॥मरीचिनाम समाराध्य·शाक्तोयचवप्रदत्तवान्॥इत्येष पूर्वाम्नाय·प्राचीसिंहास ॥४॥
नस्थिता॥ ॥इति श्रीपूर्वेश्वरीपूर्वाम्नायः॥ १ ॥दक्षिणाम्नायं वक्ष्यामि·महावीर्यो महोत्सवम्॥अघोरभैर
वोढिता·निशोशीवनिलंगता॥निरालम्बेश्वरीनित्या·अघोरं तच्छिवं विदुः॥सिंहासनगता नित्या·निशे
शीरक्तवर्ज्जिका॥चैतन्यभैरवीकेचि·दन्तकालीतिकेचन॥सुन्दरीकालिकाकेचि·दघोरेश्वरीकेचन॥ध्या

नरूपन्तु वक्ष्यामि·भैरव्याश्चाप्यधिष्ठिता॥नित्यानिरंजनिरंता·निःश्रेणीनिर्गुणाप्रया॥क्रतुनाराधिता देवि
धर्म्मराजाय वै पुरा॥संप्रदायक्रमेणैव·देवी चैतन्यभैरवी॥चतुर्द्देहासनादेवी·महत्फेत्कारसंस्थिता॥प्रः
ज्वलन्तीचितामध्ये·दाक्षिण्ये दक्षदापरा॥अलातचक्रवद्यस्याः भ्रमन्ती शिरमालिका॥स्नासुलक्षारुशांगीः
व·अस्थिचर्म्माविशोषिता॥व्याघ्रचर्म्मकटिवृता·नरचर्म्मोत्तरीयका॥सहस्रादित्यसंकाशा·तप्तकाञ्चन
सप्रभा॥पंचवक्त्रावातिनीमा·त्रिपंचनयनैर्युता॥शीघ्रदास्यालल्लजिह्वा·निम्ननाभिःकृशोदरी॥विकराला
सनस्थाना·वक्रवक्त्रासनेस्थिता॥रौद्रीनयाग्रहाघोरा·वंद्राद्धैकृतकेतना॥वर्द्धरोर्द्ध मुक्तकेशी·नागराजवि
राजिता॥कवन्ध उद्दमीशसुन्ता·ब्रह्मशीर्षशिखामणी॥सद्यश्छिन्नगलद्रक्त·शिरोमालाविभूषिता॥भुजषो
डशसंयुक्ता·गजकञ्चुकिकिंकिणी॥पाशांकुशकपालञ्च·खट्वांगंमुण्डडिण्डिमं॥खड्गफेटवाणधनुः·अक्रदण्डः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कमण्डलुं॥ अभयं वरदं चैव तर्जनी विधृता करैः॥ मुद्रिता सिद्धिमधुना शक्तिभिः परिवारिता॥ हुं हुं हुंकार नादेन त्राशय
न् देवतागणान्॥ ऋग्यजुःसामाथर्वाख्य वेदस्योपरि सोपरि॥ शवरूपमहादेव हृदयोपरि संस्थिताः॥ निशेशी साम
ह्येषा सा दक्षिणाचारवर्ज्जिता॥ नेष्टा तु ज्येष्ठभेदास्ति याम्यसिंहासनस्थिता॥ तस्याङ्गदेवताः सर्वा वक्तुं भेदा महोत्त्वः
णा॥ जंभिनी स्तम्भिनी तारा मोहिनी क्षोभिनी शिवा॥ मृत्युञ्जया चर्च्चिका च सिंही दक्षिणकालिका॥ प्रचण्डा उग्रचण्डा च ॥रा०कः॥
उग्रतारा कपालिनी॥ त्वरिता छिन्नशीर्षा च बगलावाक्प्रदायिनी॥ नीलसरस्वती भीमा त्रैलोक्या डामरेश्वरी॥ त्रैलोक्य ॥५॥
विजया चण्डी रक्तावामुण्डा भैरवी॥ दक्षिणाम्नायदेवेशि नानाभेदविशालिनी॥ व्राह्म्याद्यष्टभैरवा यक्ष क्षेत्रपालाष्ट
मेव च॥ स्वक्षेत्रनाथं वटुकं गणेशं श्रीयोगिनी॥ एकाविभिन्नरूपा सा समन्नीयालनाप्य वा॥ अघोरस्य गणा सर्वे
नानापरिषदावृताः॥ महाचण्डाट्टहासेन्दु पूरयन्तो दिगन्तरा॥ वेताला वटुकाः सत्र डाकिनीगणसंवृताः॥ वालली

भ्नो

ला समापन्ना निशाचरगणैर्वृताः॥ दण्डपाशोद्यतकराः सर्व्वसाधकसिद्धिदाः॥ शाकपुष्करद्वीपेषु साधका भेदय
र्शिनी॥ चौहारगह्वरे पीठे योनिमण्डलमार्गगं॥ वामाचाररतापूज्या घणिमाद्यष्टसिद्धिदा॥ सूत्रमेतन्मया प्रोक्तं दक्षिणाम्ना
यसंगतं॥ ॥इति दक्षिणाम्नायनिशेश्वरी॥ २॥ सिंहासनं प्रतीच्यान्तु संक्षेपं शृणु पार्वति॥ अनेकशतसाहस्र श्रीना
थेनावतारितं॥ मन्त्रं नानारहस्यं च जामलं लक्षसंमितं॥ स्वयोनि मथना देवी स्वकीयरसनापुरा॥ ब्रह्माण्डगर्भनिः
सृत्या ज्ञातदिव्येन योनिना॥ तदारभ्य महेशानि कुजादेवी निविश्रुता॥ ज्येष्ठवालादिभेदेन कुब्जिका लोकपूजि
ता॥ सद्योजातमुखोद्भूता पश्चिमाम्नायदेवता॥ कुब्जिका जगतामाद्या महासंहाररूपिणी॥ अनन्तदेशिकैः से
व्या नित्या शिवसमागता॥ ज्येष्ठवालप्रभेदेन वक्रमार्गप्रवाहिनी॥ द्वात्रिंशभेदसंयुक्ता कुब्जिका भैरवाश्रिता॥
हृद्यभेसंस्थितं देवं रववर्ण्णरूपशोभितं॥ एकवक्त्रं त्रिनेत्रं च भुजाष्टादशधारिणं॥ परशुं डमरुं बाणं खड्गं अंकुशं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वज्रकं॥ शंखं च वेणुं वाद्यं च· वरदाकरदक्षिणे॥ वामे खट्वांगशूलं च· धनुः फलकपाशकं॥ घंटां कपालं वेणुं च अ
भयं नयनाशनं॥ घट्टेन वंधितं जानुं वामोरुस्था च कुब्जिका॥ एकवक्त्रा त्रिनेत्रा च· अरुणा वरवर्णिनी॥ द्विभुजा
वरदा देवी· सिंहस्था अभयस्वयम्बु॥ नानाभरणभूषाङ्गी· खण्डेन्दुकृतशेखरा॥ वर्वराकेशपाशेन· चारुपीनघनस्तः
नी॥ कुब्जेशनाथवीरेण· कुब्जाम्नायप्रकाशिता॥ एवंध्येया कुब्जा माता· पश्चिमाम्नायनायिका॥ तत्रैव वक्त्रभेदो ॥रामः॥ ॥६॥
स्ति· कुब्जिका कुलमार्गगा॥ विभिन्ना सिद्धिनाथेन· श्रीनाथे नावतारिता॥ सर्वाभरणसंशोभा· लक्षणो असुशोभि
ता॥ नवात्माश्रीशिखानाथः स्वच्छन्दललिते भैरवौ॥ क्रमेश्रीचक्रिखण्डा च· चण्डचण्डकपालिका॥ अन्नपूर्णा करा
ली च· ज्वालामालिनी कामिनी॥ ईशाद्या मातरगणा· असितांगादि भैरवाः॥ ब्राह्मी माहेश्वरी चैव· कौमारी वैष्ण
वी तथा॥ वाराही चैव माहेन्द्री· चामुण्डा सप्तमी स्मृता॥ अष्टमी च महालक्ष्मी· रेताः सर्वाः प्रपूजयेत्॥ असितांगो

रुरुश्चण्डः क्रोधोन्मत्तकौ तथा॥ कपाली भीषणाख्यश्च· संहारश्चाष्टमस्तथा॥ षडाम्नायप्रपूज्या वै· मातृकाः स
भैरवैः॥ गणेशो वटुकक्षेत्र· योगिनीसंघकाः स्मृताः॥ डाकिनीभूतवेताल· चेटिकागणसंवृताः॥ डाकिन्यादि म
हाशवाः षड्योगिन्यः प्रकीर्तिताः॥ डाकिनी राकिणी घोरा· लाकिणी काकिणी तथा॥ शाकिनी हाकिनी प्रोक्ता याः
किनी सप्तधा ततः॥ संस्थिता देवताः पूज्या· स्वरूपेण भैरवः॥ सद्योजातनपूजिता तु· कुब्जिका चक्रनायिकाः॥ अंगि
राः संधिताः विद्या· दक्षाय प्रतिपारिता॥ नृसिंहाय ततो दत्ता· ततश्चन्द्रान्वयायच॥ पार्थिवानां च सोम्यानां· कुः
लदेवीति कीर्तिताः॥ अनेकसिद्धिदा सर्वे· कृपास्तु वै ह[illegible]स्मृताः॥ दुर्वासाराधिता विद्या· निराचारकलान्विता॥
वाममार्गरता नित्या॥ दक्षिणे फलवर्जिता॥ मकाराः पंच केः पूज्या· नान्यथा फलदा भवेत्॥ शौचाचारे निराचार· निःक
लंका निराश्रया॥ अणिमादि महासिद्धि· साधनाशीघ्रसिद्धिदा॥ मोक्षदा भोगदा देवि· कुब्जिका कुलमातृका॥ वक्त्रः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धावर्ण्णितादेवि· तवाग्रेश्रीमतादिषु॥ मन्त्रानन्तेरवेवाणि चतुर्व्विंशतिकेषु च॥ ॥इतिपश्चिमसिंहासनं॥ ३॥ वामदेवाश्रिता
म्नाय· कथयामि तवाधुना॥ उग्राम्नायसमुत्तरञ्च· कालीकुलसमुद्भवा॥ कोटिकोटिप्रभेदोस्ति· कालिका उर्द्ध मिश्रिता॥
आज्ञासिद्धिप्रदादेवि· विष्णुतेजः प्रवृंहिता॥ नारायणीमहाकाली· जगद्रक्षणतत्परा॥ कालीकालीमहाकाली· च
ण्डयोगेश्वरीतिच॥ तिष्ठन्गछन्स्मरन्नित्यं· मुच्यते महतोभयात्॥ आब्रह्मस्थावरान्तांच· कालेन कलयन्तिच॥ ॥रा॰म॰॥
तं कालं कलयेत्काली· ततः साकालिका स्मृता॥ अनेकचक्रवक्त्रेशी· नानाभेदमहागमा॥ शक्यते कालिका देथा ॥८॥
देवाब्रह्मादयोपिहि॥ तथापिलेशमात्रं तु· कुमारीक्रमतः शृणु॥ नीलवर्णामहाकाली· त्रिमुखानवलोचना॥ पी
तन्तु दक्षिणंवक्त्र· मुत्तरं पावकोपमं॥ मण्डलंवितनेत्रान्तु· अष्टबाहुर्नतनूधरा॥ पिंगरोर्द्धजटाटोप· चन्द्रार्द्धकृतः
शेखरा॥ सप्तविंशतिमुण्डाश्च· रक्तविन्दुप्रसंयुताः॥ अस्थिकुण्डलशोभाढ्या· मौलिकापालमालिनी॥ किंकिणी

न्नोपुरशव· वीरघण्टारवोत्करा॥ शिवाप्रेतसमारूढा· मुखशोणितनिर्झरा॥ इन्द्राद्याब्रह्मविष्णुश्च· रुद्रेश्वरसदाशिवाः॥ पी
तथ्यामरक्तधूम्र· श्वेताभाः पञ्चकालिका॥ वज्रदण्डशक्तिशूल· खड्गांगायुधधारकाः॥ तर्ज्जनीमुखनिक्षिप्ता· शिवाधः
स्थात्रिलोचना॥ वह्निपद्मासनादेवी· पीनोन्नतपयोधराः॥ वामहस्ते कपालञ्च· रक्तपूर्णातिशोभना॥ धारयन्तीत्रिशू
लञ्च· सशब्दं दक्षिणे करे॥ वज्रञ्च दक्षिणे हस्ते· अंकुशं मुद्गरं तथा॥ वामे पाशञ्च खड्गांग· मृतबालञ्च धारिणी॥ वि
कलाकलवान्तस्था· ज्योतिरूपा चकेवला॥ निर्व्वाणपददातीता· भवातीताखगोचरा॥ अस्यां मूर्तौ महादेव्या· नव
वक्त्राणिपूजयेत्॥ वहूनिभेदरूपानि· कालिकाया महेश्वरि॥ आज्ञासिद्धिप्रदानित्या· कौलिकामार्गवर्त्तिका॥ महाकु
लालिकायाता· विष्णुकालित्वमागता॥ यस्याः प्रभावमतुलं· वर्णितुं नैव शक्यते॥ दुर्व्वासा नारदो व्यासो· वशिष्ठः
कौशिकस्तथा॥ त्रिचतुः पञ्चसप्ताहा· देकाहात्सिद्धिमागता॥ अणिमाद्या महासिद्धि· स्तस्याङ्गसिद्धयः स्मृताः॥ मो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क्षप्रासिद्धिदा काली· निर्वाणेशी श्वरी शिवा॥ कैवल्यमेकासिद्धिःस्यान्महाज्ञानप्रकाशिनी॥ साधकोः भैरवः साक्षाज्ज्ञानगम
स्यावर्ज्जितः॥ धनदस्य न सा भूतिर्न शक्रस्य प्रजापते॥ या भूतिः साधकस्यैव· भवेत् त्रैलोक्यदुर्ल्लभा॥ पञ्च पञ्चक्रमे देवि
पञ्चैकाल्यानुशाशिनी॥ गुह्यकाली महादेवी· वैष्णवी ब्रह्मरूपिणी॥ वामदेवार्च्चिता सर्व्वैः महाभैरवकोटिभिः॥ गणे
शवटुयोगिन्याः शतकोटिसहस्रकं॥ भूतवेतालडाकिन्यो· वटुकाराक्षसा खगाः॥ फेरवाः काककृध्राश्च· उलूकाग ॥रामः॥
रुडावकाः॥ शृगालिकं कटिश्युगा· नानारूपा महाबला॥ आम्नाययज्ञावदन्तीरु· उन्तरन्तुनिरुत्तरं॥ ॥इत्युत्तराम्ना ॥८॥
यकालीक्रमः॥ ४॥ ऊर्द्ध्वसिंहासनं वक्ष्ये· त्रैलोक्यैश्वर्य्यसूचकं॥ सर्व्वचक्रेश्वरी नित्या· सर्व्वाम्नायप्रपूजिता॥ सर्व्वसिं
हासनमयी· श्रीशांनासनसंस्थिता॥ परब्रह्मेश्वरी माया· देवी नारायणी स्मृता॥ निद्रा बुद्धिः क्षमा क्षान्तिः क्षुधा लज्जाः
स्मृतिर्धृतिः॥ प्रज्ञा शान्तिः प्रज्ञा जान्तिः तस्याः पादं गुली नरवे॥ यस्या दृग्ज्ञानमात्रेण· साक्षाल्लक्ष्मीपतिर्भवेत्॥ य

स्या वा कर्म स्पृशन्ताः यस्या मार्गानुसारिणी॥ राजराजसमो भूत्वा· सुरराजसमोपि वा॥ भुक्त्वा बुद्धिपुलान्भोगा· नन्ते निः
र्वाणमाप्नुयात्॥ कदाचिद्योगिनो भूत्वा· कदाचित्पुरुषो भवेत्॥ विष्णुरूपेण सकलं· दुष्टान्सर्व्वान्विनाशयेत्॥ जगद्या
प्रवती माया· मोहयेत्तु सुरासुरान्॥ स्वरूपारूपिणी भूत्वा· स्तुस्तनी चारुहासिनी॥ कृशमध्या च तन्वङ्गी· खण्डेन्दुकृत
शेखरा॥ त्रिनेत्रा सर्व्वसर्व्वज्ञाङ्गी· चारुवेशमनोरमा॥ पाशाङ्कुशेक्षुचापांश्च· पञ्चबाणधनुर्द्धरा॥ ब्रह्मविष्णुरुद्रेशी
शाँनैः पञ्चपादेसमाश्रिताः॥ सदाशिवाख्यपर्य्यङ्के संस्थिता परमेश्वरी॥ पराशक्तिः सुन्दरीति· त्रिपुरेशीति गीयते॥ म
हामोक्षप्रदा देवी· परंब्रह्मस्वरूपिणी॥ वक्त्रे पादविशालाक्षा· वक्त्ररूपाप्रकाशिनी॥ कामेशी रुद्रशक्तिश्च· पूर्णापी
ठवतारिता॥ वज्रेश्वरी विद्ये वीनित्या· कामरूपनिवासिनी॥ शक्तिश्वरी भगेशी च· जालंधरप्रतिष्ठिता॥ ब्रह्मशक्तीस
मुल्लास· पीठगङ्कुरविग्रहा॥ उग्रानपीठनिलया· परंब्रह्मान्निकाशिवा॥ पीठेश्वरी मंत्रमाता· सर्व्वेशी सर्व्वविग्रहा॥ मः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

स्त्र २

डाम्नाये श्वरीनित्या· त्रिःरंशानिं परिपठ्यते॥ नित्याषोडशविद्यासु· नवचक्रे व्यवस्थिता॥ नवचक्रेश्वरीनित्या· नवकोणाय
न्तःस्थिता॥ त्रैलोक्यमोहनं चक्रं· सर्व्वाशापरिपूरकं॥ सर्व्वसंक्षोभनं चक्रं· सर्व्वसौभाग्यदायकं॥ सर्व्वार्थसाधकं चक्रं सर्व्व
रक्षाकरं परं॥ सर्व्वकामप्रदं चक्रं सर्व्वसिद्धिप्रदायकं॥ सर्व्वानन्दमयं चक्रं नवमं चक्रनायिका॥ तत्र सर्व्वे वैन्दवे लीना ॥राम॥
न्यष्टौ चक्रमुदाहृतं॥ त्रिपुरा त्रिपुरेशी च· सुन्दरीपुरवासिनी॥ श्रीमालिनी च सिद्धाम्बा· महात्रिपुरसुन्दरी॥ अने ॥२॥
कदैवता वृन्द· लीना चक्रेषु संस्थिता॥ वैन्दवे च त्रिकोणे च· अन्तराले षट्कोणके॥ द्विदशारे च मन्वस्रे· नागपत्रेषु
सर्व्वतः॥ पत्रे षोडशसंख्याते· चतुरस्रे गुणास्पृशेत्॥ रक्षायुक्तं चतुर्द्वारे· त्रैलोक्यं तत्र पार्व्वति॥ हिरण्ये रजते ताम्रे
मणौ पत्रे थ भूर्जके॥ कोशे स्फाटिके वापि· दृष्ट्वा तु परमेष्ठिये॥ सर्व्वतीर्थेषु सस्नातः सर्व्वयज्ञेषु दीक्षितः॥ सर्व्वदः स
र्व्ववित्साक्षात् महेश्वरसमो भवेत्॥ श्रीचक्रं कारयित्वा तु· योदद्यात्साधकाय च॥ सूचक्रे तेन दत्तं हि· सशैलवनकान

वा १

नं॥ सवेमहायाग्नुपतः सर्व्वे वेदवसत्तमः॥ सर्व्वदः सर्व्वदर्शी च· ब्रह्मज्ञानी सर्व्वे सुधीः॥ महदानानि प्रोक्तानि· मुनिभिर्ब्रह्म
वादिभिः॥ तत्फलं लभते नूनं· श्रीचक्रस्य प्रभावतः॥ कोटिलिंगप्रतिष्ठस्य· यत्फलं समुदाहृतं॥ तत्फलं लभते नूनं· श्री
चक्रं परिपूजने॥ विष्णुकोटिप्रतिष्ठायां· फलं प्राप्नोति निश्चितं॥ हिरण्ये रजते ताम्रे· मणौ पट्टे च स्फाटिके॥ अंकित्वा तु
धारयेद्यस्तु· करे कण्ठे भुजेपि वा॥ यानि कानि च पापानि· ब्रह्महत्यासमानि च॥ मुच्यते सर्व्वपापेभ्यः· श्रीचक्रस्य च
धारणात्॥ भूतप्रेतपिशाचैश्च· ब्रह्मराक्षसैः॥ डाकिनी साकिनीभिर्व्वा· वीक्षितुं नैव शक्यते॥ महाक्रूरग्रहः
रुगणैः रंध्रस्थानस्थितोपि वा॥ गोचरे जन्मलग्ने वा· सर्व्वेषुनग्रहं भवेत्॥ अकालमृत्युं हरति· सदासन्निहिता परा
॥ परासन्निहिता यत्र· किं कुर्व्वन्त्यन्यदेवताः॥ श्रीचक्रं धारयित्वा तु· यस्तु प्राणान्त्यजेद्बुधः॥ कीटकेवान्तरीक्षे वा
निषिद्धे कस्मलेपि वा॥ कृत्वा चेन्द्रियसौख्येन· पापानि सुबहून्यपि॥ स कैवल्यं लभेन्नूनं· न पुनर्जन्मताम्भवे

CC-0. In Public Domain. Digitization by eGangotri

वेत॥ क्लीं कें ऐं चांन्ते रीं क्षें वीं ऐं ह्रीं क्रें॥ यमदूताः पलायन्ते· दृष्ट्वा श्रीचक्रधारिणां॥ ब्रह्मज्ञानेन वा मोक्ष· काश्यां वा यस्तनुः ॥राम:॥
नुं त्यजेत॥ श्रीचक्रधारणाद्यापि· तत्र्यं मोक्षस्य कारणं॥ सर्व्वदेवगणास्तत्र· सर्व्वधर्म्माश्च तत्र वै॥ गंगाद्याः सरितः सर्व्वा ॥१०॥
:पुष्कराद्या जलाश्रिताः॥ कुरुक्षेत्रमपुर्याद्य· क्षेत्रानन्दवनादयः॥ वाजिमेधादियज्ञाश्च· फलं वादिकलं भवेत॥ वाम
दक्षिणयोगेन· सुन्दरी द्विविधा स्मृताः॥ सुन्दरी द्विविधा प्रोक्ताः वामदक्षिणसाशने॥ अचिरेण भवेद्धामः सर्व्वकामान
शंशयः॥ दक्षिणाचारयोगेन· भिक्षुर्न्नो केवलं भवेत॥ तदन्याचारयोगेन· शीघ्रं सिद्धिं प्रयच्छति॥ श्रुतिस्मृत्यनुयो:
गेन· ब्रह्मत्वं च प्रयच्छति॥ अतएव महादेवि· साक्षाद्ब्रह्मस्वरूपिणी॥ शब्दब्रह्ममयी साक्षा· द्रूपिणी परमेश्वरि॥ शब्दब्र
ह्मविजानीहि· साक्षाद्ब्रह्मस्वरूपिणी॥ षोडशार्णा महादेवी· वाच्यरूपेण संस्थिता॥ तुरीया सा महाविद्या· साक्षाज्ज्ञाप्र
स्वरूपिणी॥ वक्त्रकोटिसहस्रैस्तु· जिह्वाकोटिशतैरपि॥ वर्णितुं नैव शक्नोति· श्रीविद्याषोडशाक्षरी॥ ब्रह्मविद्यास्वरू

पिणी· भुक्तिमुक्तिफलप्रदा॥ एकोच्चारेण गिरिजे· ब्रह्मत्वं लभते ध्रुवं॥ षोडशार्णां महाविद्या· न प्रकाश्या कदाचन॥ विना
गुरुप्रसादाद्धि· न जपेद्धि कदाचन॥ दृष्ट्वा प्रजप्यते यस्तु· स भक्षो योगिनीगणैः॥ श्रीगुरोः कृपया लब्धा· न प्रकाश्या कदा
चन॥ श्रीगुरोः कृपया लब्धा· सर्व्वसाम्राज्यदायिनी॥ सुधातरङ्गिनीवेग· शब्दचातुर्य्यदायिनी॥ सौभाग्यभोगसंपन्ना
कुलाकुलालयदायिनी॥ भुवनत्रयसौभाग्य· त्रैलोक्याकर्षणं तथा॥ परं ब्रह्मशीलीन तत्त्वं ददातीतेज उत्तमं॥ षोडशार्णा
महाविद्या· भुक्तिमुक्तिफलप्रदा॥ साक्षात्संवित्स्वयीनित्या· ज्ञानमोक्षप्रदायिनी॥ महासंपत्प्रदा विद्या· साक्षादक्षर
रूपिणी॥ षोडशार्णा महाविद्या· श्रीविद्या कथिता पुरा॥ निधानं रक्षणं कार्यं· चौरेभ्यस्तु यथा प्रिये॥ प्राणेनापि रक्ष
णीया· श्रीविद्याषोडशाक्षरी॥ राज्ञे राज्यं प्रदेयं वै· प्राणेभ्योपि प्रियान्यथ॥ सौवर्णं राजतं ताम्रं· श्रेष्ठं मध्यमथाधमं
॥ताम्रे लक्षगुणं प्रोक्तं· रौप्यं कोटिगुणं भवेत॥ सौवर्णेऽनन्तफलद· मथासौ किं ब्रवीमि ते॥ बाल्लानुप्रथमा भेदाः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ततो वाग्भैरवी स्मृता॥ संपत्प्रदा श्रीपदा च ततस्त्रिपुरभैरवी॥ विन्दुमालिनी ची लेखा हृल्लेखा श्रीपराकला॥ षट्कूटा
नवकूटा च लोपामुद्रा त्रिकूटका॥ पंचमी पंचकामिन्या श्रीविद्याका मराज कं॥ षोडशार्णा पराविद्या सा देवी श्रीपर
मेश्वरी॥ परा युक्ता च या सा देः शाम्भवं समुदाहृतं॥ अणिमाद्या महासिद्धिरन्तराया प्रकीर्त्तिता॥ पंचसिंहासनेः स्थि
ता महात्रिपुरसुन्दरी॥ साक्षाज्ज्ञानस्वरूपा च देहमवीपर देवता॥ सर्वस्वरूपिणी सत्या प्रकृतिः परमेश्वरी
॥ सर्वजीवस्वरूपा च सूक्ष्मलिंगस्वरूपिणी॥ सर्वोत्पत्तिहेतुभूता योनिरित्यभिधीयते॥ सिंहासनस्वरूपा या ॥रा मः॥
ऊर्ध्वाम्नाये प्रचोदितं॥ ॥इति पंचसिंहासनी श्रीविद्या॥ ५ ॥ अधाम्नायं शृणु षत्वं सावरीजिनमातृका॥ अशे ॥१२॥
ष कर्मनिर्माणा कलौ शीघ्रफलप्रदा॥ बौद्धमार्गनिरातंका सौगता कर्मसाधुगा॥ आम्नायान्तरसारीति
ख्याता सा वज्रयोगिनी॥ त्रिवक्त्रा रक्तवर्णा सा नृत्यमाना शवासना॥ त्रिनेत्रा मुण्डसंवीत हाडाभरणभूषिता

॥ मुण्डमालाविभूषांगी व्यालयज्ञोपवीतिनी॥ व्याघ्रचर्माम्बरा देवी सिंहचर्मोत्तरीयका॥ वैलोचनी वज्रपूर्वा वज्रघं
टा वरप्रदा॥ चतुर्भुजा प्रेतसंस्था वर्द्धशोर्द्धशिरोरुहा॥ दधी कपालं खट्वांगं डमरुं च करैर्धृता॥ सौगतानां वरा सर्वा
कलौ शीघ्रफलप्रदा॥ इह चैव फलदा सत्या नापवर्ग फलप्रदा॥ सौगतानुगता सर्वे नानाभेदसमाश्रिताः॥ कालसः
म्बरचक्रं च हयग्रीवाख्यभैरवं॥ योगाम्बरं ज्वकालेशं सावरी सौगताश्रिता॥ ॥इति श्रीपरातंत्रे पंचसाहस्रिका
यां षडाम्नायक्रमसूत्रे॥ ६ ॥ श्रीदेव्युवाच॥ देवदेव महादेव सर्वज्ञ परमेश्वर॥ अत्यद्भुतमिदं मन्त्रो कालीकुलकुलोद्भवं॥
मानसं कंपते तीव्र रोमहर्षश्च जायते॥ कथं सा कालिका देवी शतकोटिप्रभेदतः॥ एतद्भेदक्रमे क्वापि न श्रुतं पर
मेश्वर॥ सर्व कालिक्रमाश्रित्य स्थिते वशास तेम नः॥ चक्रभेदं कालिकायाः का च सर्वाधिकारिता॥ क्रमभेदे कुलो
भेदं कथं पूजाक्रमं भवेत्॥ तस्याश्चैतेन देवेश लभेद्वा किं महाफलं॥ इह वा मुत्र किं मुक्तो साधकः परमेश्वरः॥ कथं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कालीस्वबालं वा·सालं वा कालघस्मरः॥ निर्गुणा निष्कला नित्या·निरंशा नित्ययोदिता॥ कोटिभेदं लक्षभेदं वक्तुं यदि न शक्यते
॥मुख्यमार्गानुगा देव्या· नायिका त्वं वशंकरः॥ यस्यार्च्चनेन सकलं· कालिकापूजितं भवेत्॥ एकैवासा परा नित्या· आदेः
वी चित्तिरूपिणी॥ सर्व्वस्वरूपा सर्व्वेशी·चित्तिरूपा चिता परा॥ यस्या मुखाम्बुजे विश्वं· लीयते त्यीयते पुनः॥ वद देव महेशा
न नमस्ते शशिशेखर॥ तासां वक्त्रेश्वरी नित्या·का रूपा कति संख्यकाः॥ अमृतस्येव पानेन·यथा तृप्यन्ति देवताः॥ नायिका ॥रम॥
क्रमभेदं च· श्रुत्वा तृप्यामि पुष्करः॥ वदस्वेशान नेदेव·सर्व्वज्ञ सर्व्व सर्व्वतः॥ ॥श्रीसदाशिवोवाच॥ ब्रह्माण्डकोटिलक्षा ॥१२॥
णि·भस्मसात्कुरुते यथा॥ तां कालग्रासनरतां·कालसंकर्षणीं नुमः॥ शृणु देवि प्रवक्ष्यामि· यत्त्वया मम्पृच्छते॥ एकैः
व सा परा शक्तिः· बहुभेदप्रकाशिनी॥ नित्यानित्यं(?) सा सा देवी· ब्रह्मसत्यप्रकाशिनी॥ वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिः
शतैरपि॥ वर्णितुं नैव शक्नोति· शङ्केनापि च सुन्दरी॥ पंचवक्त्रेण जिह्वाभिः पंचभिः परमेश्वरि॥ लक्षकोटिप्रभेदेषु दे

वि शमात्रं वदामि ते॥ कालिकाक्रमभेदेषु·या श्रेष्ठा मोक्षदायिनी॥ तानि ते कथयिष्यामि· क्रमतन्त्राधिनिर्णयं॥ परं ब्रह्मम
यी नित्या·साक्षाज्ज्ञानस्वरूपिणी॥ निर्लेपा निर्गुणा नित्या· गुणैः संक्रीडते जगत्॥ न पुमान्न स्त्रियः साक्षात्· न खण्डयाकृ
तेन वा॥ अव्यक्तरूपा परमा· आत्र(?)गुणगुणालया॥ पृथिवी वा सुरा योग्निः खपञ्चभूतसम्भृता॥ तस्या रूपमिदं सर्व्वं· सृष्ट्यर्थं
सृजते गुणैः॥ धारणी परमा देवी· धरणी या दिशि वान्तया॥ पृथुत्वात्पृथिवी त्युक्ता· ततः सर्व्वं सदुद्भवं जगत्॥ सर्व्वं जीवप्राणाय ह्य
नी· सर्व्वत्र चरणक्षमः॥ सपः सर्व्वत्र प्रेतायुः गुणौ व्यायोः समर्थितः॥ चतुर्व्विधं जीवनाञ्च· जंत्या वरजं गमं॥ जले सम्बर्द्ध
येत् सर्व्वं· तद्गुणं साजलोर्थितं॥ दहत्यग्निजगत्सर्व्वं· मम मेध्यं मेध्यमेव वा॥ तेजसा स्याः समाश्रित्य· व्यापकत्वात् गुणाश्रयात्॥
आकाशो व्यर्थिता देव्या· सर्व्वं संधार्य्यते गुणैः॥ महासौभाग्यजननी· महासारस्वतप्रदा॥ महासौन्दर्य्यभुजगा· महामृत्यु
विनाशिनी॥ ब्रह्मविष्णुसुरेन्द्रादि· वन्दिता पापहारिणी॥ सर्व्वतीर्थमयी देवी· सर्व्वधर्म्ममयी शिवा॥ महाभोगप्रदा शान्ताम

न१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

णमोक्षफलप्रदा॥यस्याः प्रभावतो देवीः सर्वं सुधनिना न्यथा॥वामाचारस्ता वापि दक्षिणाचारकश्च वेत्॥निराचारा
पिशाचाराः पापं धर्म्मं न विद्यते॥किमाचारविचारेण यदि काल्यां ईमेरतः॥किमाचारविचारेण यदि काल्या न दीक्षि
ताः॥निराचाराः क्रिया सर्वाः साचारक्रियते यया॥स्वेछाग्रं मसानियमो निराहार समं स्मृतं॥कालीनामाक्षरपदं जप
त्पापानि नश्यते॥महापातककोटीनां लीलये व विनश्यते॥दहते सर्व्वपापानि तूलराशिमिवानलः॥चक्रोद्धारं प्र
वक्ष्यामि शृणुष्वैकमनाः शिवे॥बिन्दुत्रिकोणं पंचारं नवकोणं सुनलिखेत्॥अष्टारं वा षट्दलकं दशद्वादशकं तथा। ॥२३॥
षोडशं दलमालिख्य मुण्ड्याकारमालिखेत्॥चतुःपंचाशकं देवि केवलं समुदाहृतं॥त्रिमूलाग्रे मुण्डमाला चतु
:पंचाशके प्रिये॥अष्टदिक्षु श्मशानन्तु विलिखेन्मोक्षदायकं॥ज्वलितान्गौ दग्धशवं शृगालोलूकभैरवं॥काकवेता
लवेत्यञ्च लिखे[illegible]श्मशानके॥विनाष्टदिक्षु प्रलिखेन्महापातकनाशनं॥हिरण्येराजते वापि मणौ वापि चटंकिते

:सिकृ
मुनिगण दुर्व्वासागाधिनन्दनं॥विरूपाक्षादयः सर्वे रेमिरे स्वेच्छया मुदा॥तस्याः प्रसादमात्रेण त्रैलोक्यविजयी भवेत्॥ब्रह्मणाप्रे
रितः पश्चाल्लंकेश्वरवधाय च॥विश्वामित्रवसिष्ठाभ्यां राघवाय प्रदत्तवान्॥सरयूतीरतीर्थे च दक्षिणा त्रिशताक्षरि॥त्रिशताक्ष
रिमंत्रो वै त्रैलोक्यैश्वर्यदायिनी॥दशवर्णमयी देवी गोपिता यत्नतः पुरा॥यदि पूर्व्वं भवेद्देवि मंत्रं वै त्रिशताक्षरि॥योजनाः
ति सपुण्याभ्यां भैरवोस्य न संशयः॥मंत्रमाते ति विख्याता त्रैलोक्यैश्वर्यदायिका॥समस्तमंत्रजननी सर्व्वमंत्रप्रवृंहिणी
॥वक्ष्यावर्णितमंत्रमाना सर्व्वप्रदायिनी॥प्रत्यंगिरा महाकाली मोक्षसौख्यप्रदायिनी॥नानया सदृशी विद्या विद्यते ॥२४॥
भुवनोदरे॥राज्यदा धनदा मोक्षदा च केवल्यदायिनी॥तेनास्त्रेणाचरामेण रावणो विनिपातितः॥तदाप्रभृति सा देवी
सूर्य्यवंशानृपेश्वराः॥इष्टत्वेन च संपूज्य सर्वे तस्या नुगाश्रिताः॥आद्याकालीक्रमं पश्च रकासा पञ्चधा गता॥काली
कुलसमुद्भूता पुलस्त्येनावतारिता॥कुमारी त्रिमुखी काली नवपकाक्षसाथिता॥आद्याद्यास्तष्टिकाली च छिन्नीथापि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१४५

॥चन्दनागुरुकर्पूरनासिकाम्बरसिन्दुरैः॥रक्तचन्दनसंयुक्तेन हेतुना पूजयेत्सुधीः॥भाजने लेपयेत्तेन लिखेद्धेमशलाकया
॥अनुलेखास्तु लेखेन रम्यं हृष्टिमनोहरं॥प्रतिमायां पटे वापि स्थण्डिले पुस्तके हृदि॥खड्गे वाथ त्रिशूले वा महापात्रे थवा
स्त्रियाम्॥एतेनैव तु सर्वे पूजा नवयोनिपरा प्रिये॥दिवा च वृत्ते चर्थ्ये च मंगलाय्याप्रपूजने॥रात्रौ च येष्ठ्यया पूजा कालिकाकु
लशासिनी॥कूटस्था प्रकृतिः स्या स्या लीला भुवनभावनी॥वृहद्वृहद्दतिप्रोक्ता रेखा दयिमहामनुः॥अरूपा या तु वक्ष्या
मि रूपमव्यक्तरूपिणं॥विना ध्यानेन पूजा वै सकला प्यफला स्मृता॥तस्मात्साधकसिद्ध्यर्थं ध्यानयोगं वदामि ते॥पि
तामहेन देवेन मांसमारा ध्यप्रार्थिता॥तुष्टेन वै मया दत्ता ब्रह्मणे लोकसञ्ज्ञने॥ब्रह्मणापि पुरस्ताच्च दत्तं कालिकुलाः
क्रमं॥तेन विश्ववसे प्रादाद्विश्रवा धनदाय च॥ततो लंकाधिपाः सर्वे वंशाः कालिक्रमानुगाः॥दशास्यकुंभकर्णाख्य विभीष
णो महेन्द्रजित्॥हिरण्यकशिपुर्बाणो बलिर्जालन्धरस्तथा॥अन्तरीक्षो धमान्धाता नकुषो देरुयादयः॥नारदाद्याः

तिकालिका॥संहारकालिका उग्रा तृतीया उग्ररूपिणी॥अनाख्या कालिका देवी चतुर्थी परमाम्बिका॥भासा काली पंच
मी तु अद्वैतनावमाम्बिता॥अभिन्नः रूपास्ताः सर्वा गुह्यकाली स्तनौम्बिता॥शरीर वश्यवावक्त्रा वाहूनीनां शतादिकं
॥पंचकाली महोग्रासा एकासाभिन्नरूपिणी॥आत्मा वेश्वरभूता या गुह्यकाली प्रकीर्त्तिता॥एषां ध्यानं प्रवक्ष्यामि शृणु
पापभयापहं॥ ॥अथ अस्य महादेव्या ध्यानयोगमनुत्तमं॥येन विज्ञातमात्रेण साधकः सिद्धिभाग्भवेत्॥नीलोत्पल
दलश्यामा नीलरत्नविभूषिता॥ज्ञानरश्मिच्छटानीया ज्योतिर्मण्डलसंभवा॥दशवक्त्रा महाकाली सप्तविंशतिलोच
ना॥अष्टोत्तरशतार्द्धं च भुजदण्डैर्विराजिता॥द्वीयकं उर्द्धकं वक्त्रं चाण्डयोगेश्वरीमतं॥ज्योतिर्मयं महावक्त्रं त्रिवर्णाणघद
र्शितत्॥तदधः सिंहवदनं श्वेतवर्णं सुजाम्बरं॥फेरुवक्त्रं च तदधः हृष्टं त्रैलोक्यडामरं॥कयीन्द्रस्य मुखं वामे रक्त
वर्णं महोल्वणं॥~~कपीन्द्रस्य मुखं वामे रक्तवर्णं महोल्वणं~~॥कोलवक्त्रं वेदक्षे धूम्रवर्णं भयानकं॥तार्क्ष्यवक्त्रं च वामे॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

ञ्च पिङ्गवर्णं सचुचुकं ॥ दक्षिणे मकरास्यं च हरिणा संप्रकीर्त्तितं ॥ गजास्यं वामके प्रोक्तं गौरवर्णं महोत्वणं ॥ हयास्यं दक्षि
णे कास्याः श्यामवर्णं विचिन्तयेत् ॥ सर्व्वदंष्ट्राकराला च त्रिनेत्रा भीमनादिनी ॥ कृतङ्गकुटिला भीमा कालास्या स्याच्छ्रीमुखोः
न्नमा ॥ पिङ्गलोर्द्ध्वजटाटोप चंद्रार्द्धकृतशेखरा ॥ नानारत्नैश्च घटिता श्वेतकाशालिमालिनी ॥ सप्तविंशति मुण्डैश्च रक्त
विन्दुप्रसंस्रुता ॥ वज्राग्निपुष्पसंयुक्ता शिरोमाला प्रकीर्त्तिता ॥ विद्रुत्त्वघटिका काथ खड्गपाशञ्च शक्तिकं ॥ खट्वाङ्गमु
ण्डधनुषं चक्रघण्टं च सुस्वनं ॥ बालं प्रेतञ्च शैलञ्च कंकालं नकुलं तथा ॥ सर्पञ्च कुट्टिनी वंशी षडम्बुडोडिका पुनः ॥ व ॥१५॥
ह्रिपात्रञ्च दण्डं च कूर्च्च मत्सार केशरी ॥ वज्रकुक्कुरडमरुः विभ्रती वामबाहुभिः ॥ विद्रुत्त्वघटिका कर्त्री तर्ज्जन्यङ्कुशदण्ड
कं ॥ रत्नपूर्णं च कलशं त्रिशूलं दुष्टनाशनं ॥ पञ्चपाशुपता बाणं पद्मं दीपं मनोद्भवः ॥ कुन्तञ्च पारिजातञ्च छुरिकाने
मरन्तथा ॥ पुष्पमाला डिंडिमं च शृङ्गं स्वस्तिकवर्द्धिनी ॥ कमण्डलुं कूर्चं चैव पद्मपुष्टि मयापहं ॥ नन्द्यावर्त्तकुण्डलञ्च

८३

मांसखण्डं सुशोभनं ॥ बीजपूरफलं सूची विभ्रती दक्षबाहुभिः ॥ व्याघ्रचर्म्मपरीधाना कालचर्म्मोत्तरीयका ॥ किंकिणीजाः
लशोभाढ्या वीरघण्टादिनादिनी ॥ नूपुरारावनिर्घोषा घर्घरारावभीषणा ॥ कनकाङ्गदकेयूर महास्थिकृतशीभना
॥ मुण्डमालागले देव्या आपन्नावलम्बिनी ॥ रक्तपद्ममयी माला पुष्पकामालिकास्तथा ॥ कांचीकहारकोपेता कटिदेः
व्याविराजिता ॥ ब्रह्मसूत्रोज्वलत्कण्ठा योगपट्टोत्तरीयका ॥ सौम्योग्र भूषणैर्युक्ता नागराजाग्रलंकृता ॥ रक्तकुण्डलकार्ण
श्री पञ्चकालासनस्थिता ॥ शिवासनन्तदूर्द्ध्वं च नीलं नादोर्द्ध्वलाञ्छनं ॥ महार्घरत्नमालञ्च कुद्मवर्णं चिनुर्भुजं ॥ ए
कवक्त्रं त्रिनयनं भैरवाचरणान्वितं ॥ कर्त्रिकापालहस्तञ्च डमरुखट्वाङ्गधारिणं ॥ एवं भैरवपीठञ्च देव्या आसनमुत्त
मं ॥ पञ्चप्रेतञ्च तदधो ब्रह्माद्याः पञ्चकारणा ॥ ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ पीतश्यामरक्तधूम्र श्वेतानाः पञ्च
कारणाः ॥ दण्डचक्रशक्तिशूल खट्वाङ्गायुधधारकाः ॥ तर्ज्जनीमुखनिःक्षिप्ताः शिवाधस्यात्रिलोचनाः ॥ पिङ्गरक्तात्रिपुः

CC-0. In Public Domain. Digitization by eGangotri
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रात्स्यात्‌·फेत्काररवभीषणाः॥वज्रदंष्ट्रानखस्थर्णाः·पश्चपृष्ठेशिवोत्तमाः॥अश्वीपस्यादिरत्नेन·दिव्यैर्वर्णसवर्णकं॥इन्द्रंपीता
म्बवर्णंच·वह्निरक्तंसशक्तिकं॥यमंकृष्णंचदण्डाढ्यं·धूम्रंनैऋत्यखड्गकं॥वरुणंपाशसुभ्रास्यं·वायुंश्यामंकरेध्वजं॥
कौवेरंकुङ्कुमगदं·शुक्लमीशानशूलकं॥दिगष्टपतयोज्ञेया·आसनंपरिकीर्त्तितं॥शुक्लंकृतयुगंज्ञेयं·पीतंत्रेतायु
गंस्मृतं॥द्वापरंवारुणंवर्णं·श्यामश्चैवकलिःस्मृतः॥ऋग्वेदंशुक्लवर्णंच·यजुःपीतंसुवर्णवत्‌॥सामरक्तमितिख्या
तं·कृष्णाथर्वणमुच्यते॥उपवेदास्तथावर्णा·एवमासनमनुत्तमं॥मरुस्रग्सूर्यज्वालाग्रे·भासनंपरिकीर्त्तितं॥प्रेतोप ॥२६॥
रिस्थितादेवी·नृत्यमानासदोदिता॥अथवासुखमासीनं·सर्वदेवाधियन्त्रितां॥सहस्रसूर्यप्रतिमां·दुर्न्निरीक्षां
दुरासदां॥सर्वदेवाश्रयांनित्यां·मालिनींजयमंगलां॥मुक्तहूंकारवाह्नाग्र·लालयन्तंविचिन्तयेत्‌॥प्रत्यालीढपदा
वापि·नृत्यमानादिवास्मरेत्‌॥सर्वमंत्रमयीधीरा·सर्वलक्ष्मीजयम्परी॥एवंध्येयामहाकाली·वोड्डिन्ननवयोवः

ना॥भासावक्रस्यमध्यस्था·वक्रेशाभुवनेश्वरी॥पञ्चकालीउन्नेदस्तु·विशेषंशृणुपार्वति॥नववक्त्रामहाकाली·सप्तावि
शतिलोचना॥ऊर्ध्वंज्योतिर्म्मयंवक्त्रं·चण्डयोगेश्वरीभिधा॥विद्युत्तघटिकामुद्रा·मूलदेव्यास्तुपञ्चसा॥वक्त्रेकेंरत्नमुः
द्राश्च·विहीनापञ्चकालिका॥वक्त्रेशास्त्रभुजामाला·भासनानिक्रमेणच॥भूषणादीनिवर्णानि·यथाश्रीगुह्यकालिका॥सृः
ष्टिःस्थितिश्चसंहार·अनाख्यायामहेश्वरि॥नामाकाल्यास्तुरूपाणि·विशेषासर्वतःशृणु॥विशेषिकाविशेषेण·तद्दत्स्या
मिक्रमेणतु॥नीलजीमूतसंकाशा·नववक्त्रामहेश्वरि॥पूर्वोक्तध्यानराजेस्तु·तुल्याचान्यामहेश्वरि॥वक्रपञ्चासनादेवी
पीनोन्नतपयोधरा॥त्रिकोणेणवामदंष्ट्रा·स्पर्शयन्तीत्रिभङ्गिका॥मदघूर्णितदीर्घाक्षि·ध्यानलोचनतत्परा॥विद्युत्तको
टिकात्यक्ता·वरदाभयपाणिनी॥तर्ज्जन्यग्रेस्थितंवस्त्रं·मूर्त्तिज्वलनसप्रभं॥रश्मिद्वादशसंयुक्ता·मनाख्येशीस्मरेन्मु
दा॥संहारवक्रमध्यस्था·निर्म्मांसाकोटलाम्बिका॥प्रत्यालीढपदादेवी·दन्तोष्ठघृष्टपिण्डिका॥लेलिहानाललज्जिहु

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

१२

८२

मुक्ताहंकाररूपिणी॥ वरदानं परित्यज्य विष्णुर्ब्रह्मकेशवौ॥ दशशक्तिसमायुक्ता विश्वसंहारकारिणी॥ स्थितिक्र
मस्य मध्यस्था शीर्षे हसितानना॥ खर्वा लम्बोदरी देवी राजली लासनस्थिता॥ अजरुद्रौ परित्यज्य ब्रह्मकं का
लवञ्चकी॥ वादयन्ती महाकाली· स्थितिस्था षोडशाम्बिका॥ सृष्टिक्रमस्य मध्यस्था· महहास समन्विता॥ ऊर्ध्वा सम
यं दोर्वारु· ललिता तनुविग्रहा॥ विहाय ब्रह्म वीणास्त्र· विभ्रती चन्द्रभास्करौ॥ योनिपञ्चकमध्यस्थां· ध्यायेत्सृष्टेः कारे ॥१८॥
तवे॥ अनाख्या चक्रमध्यस्था· भासा देवी जगन्मयी॥ सर्वा कालिस्तुता देवी· षोडशारे प्रतिष्ठिताः॥ चन्द्रसूर्यं परित्यज्य
मंजीरद्वयधारिणी॥ जगद्ग्रासयते भासा· काली विश्वसमुद्भवा॥ बालाकुमारी या काली· सर्वा संस्थितिरूपिणी॥
त्रिमुखाष्टभुजा देवी· कपालमालसंयुता॥ पिबन्ती रुधिरं दिव्यं· कृष्णवर्णा त्रिलोचना॥ पाशांकुशं वज्रशूलं· ख
ड्गं गंभुङ्गरं तथा॥ मृतबालं मुण्डहस्तं· कपालं रक्तपूरितं॥ एवं ध्यात्वा महादेवी· नानाभोगफलप्रदा॥ एतदेव

द्विजे दोयं· पंचकालस्य कारणं॥ ततः समस्तरूपाणि· कालिकाक्रमउद्भवा॥ विधिवत्पूजयेन्नित्यं विधिलोपं न का
रयेत्॥ यथा गुरूपदिष्टन्तु· तदेव तु समाचरेत्॥ देवता मंत्ररूपाणि· गुरुरेव न संशयः॥ शिवे रुष्टे गुरुस्त्राता· गुरौ
रुष्टे न कश्चन॥ गुरुरेव सदा पूज्यः कालिकातुष्टिहेतवे॥ अंधे तमसि संमग्ने· गुरुरेव परा गतिः॥ बन्धुपुत्रसहस्रे
षु मातुः पितुः शतेष्वपि॥ एतेभ्यो गौरवत्वाच्च· गुरुरित्यभिधीयते॥ ब्रह्महत्यादि यावन्तां निःकृतिः समुदाहृता॥ गुरुद्रो
हकृतानां च· निःकृतिर्नास्ति पार्वति॥ गुरोश्च देवतायाश्च· भेदभावं न कारयेत्॥ स्वात्मा विक्रीय तेनापि· गुरुमेव
प्रपूजयेत्॥ गुरौ तुष्टे जगत्तुष्टं· मित्याज्ञा परमेश्वरि॥ अकृत्वा नरकं याति· षष्टीवर्षशतानि च॥ अशरीरा वर्णरूः
पाः ब्रह्माण्डव्यापिनी शिवे॥ पिंडदानादिसंस्कारं· यथा पित्रोः स्तथा गुरौ॥ न माता न पिता पुत्रा· भ्राता बन्धु सुहृन्नृपः॥ गु
रोर्गुरुतरं देवि· न कुर्याः त्रिभिस्सर्वथा॥ यस्य प्रसादाज्ज्ञानीयात् त्रैलोक्यं सचराचरं॥ नतो पितो गुरुर्येन· तस्यास्याभि

पुदंवना

:फलाक्रिया॥यस्य वक्त्राद्विनिर्याता-देवी शब्दमयी परा॥न गुरुं वञ्चयेच्छिष्यैः प्राणैः कण्ठगतैरपि॥देवता मंत्रसकलं लं
घितं तेन भैरवि॥गुरुर्देवतमंत्राणि-मनागप्येवं न कारयेत्॥भेदे नशैलि नं यान्ति-समूलं विनिकृन्तिवै॥गुरुं संतोषयेद्यत्नैः
स्वप्राणेनापि शुद्धया॥दीपस्येव वेत्तारो तारंगनि मवाप्नुयात्॥गुरुः संतोषितं येन-रक्षितं भुवनत्रयं॥नानंप्ररतरंक्षि
ञ्चितः-गुरोरप्यधिकं प्रिये॥शरीरदर्शिता ज्ञेयो-ज्ञानदो गुरुरेव च॥गुरोर्गुरुतरो नास्ति-संसारे दुःखसागरे॥यस्य वक्त्रा ॥१८॥
द्विनिर्यातं-वर्णब्रह्ममयं वपुः॥तारयेन्नात्र संदेहो-नरकार्णवतो ध्रुवं॥अथाहं संप्रवक्ष्यामि-सारं सर्वार्थसाधनं॥एका
क्षरी नवाक्षरी च-षोडशाक्षरी वारुणी॥चतुःपञ्चाशवर्णा च-द्वात्रिंशताक्षरी॥सहस्राक्षरी देवेशि-प्राप्तभुनातु
कालिका॥अम्बरं पवनं वह्नि-रोपश्च धरणी तथा॥वारुणी नाम सा विद्या-मोक्षदा मुक्तिदा प्रिये॥एकाक्षरी परा विः
द्या योगमोक्षफलप्रदा॥शिवशक्तिसमायोगो-नवेदत्र नवपार्वति॥महाकुण्डलिनी देवी-महादेवेति पूजिता॥वह्निः

शिवान्कवान्तश्च-कालञ्चवारुणं तथा॥शिखी च मधुरायुक्तं-काली प्राणमुदाहृतं॥खौं मात्मकमालिख्य-महाचण्डं ततो
लिखेत्॥योगि मूर्ध्नि पदं दत्वा-विद्येयं सा नवाक्षरी॥षोडशाक्षरी या विद्या-प्राणभूता श्च ताः शृणु॥यस्योपदेशमात्रेण वु
लभूयाय कल्पते॥ये यदन्तु समुद्धृत्यः महाशवं ततो लिखेत्॥निशामाधव संयुक्तं ज्ञेयं त्रिदशवन्दिते॥सन्यारूढः सा
त्वतश्च-तुष्टीनाकवलीकृतः॥सत्य सत्या समारूढा-सूक्ष्मेण केवलीकृता॥ततश्च क्रौं आढ्य रञ्च-नारायणासमन्वितं॥:
माधवे मसमायुक्तं वा लावीजं पुनर्लिखेत्॥मायाचण्डी कूर्चलक्ष्मी-महाशब्दं पुनर्लिखेत्॥नतिं निश्योजयेद्देवि
शिरो मंत्रं समुच्चरेत्॥वर्णषोडशमाख्यातं-मंत्रराजमुदाहृतं॥पञ्चपिंडाग्रतो दत्वा-महासप्तदशी भवेत्॥अनादिम
महामंत्रं-वर्णराजमुदाहृतं॥शताक्षरं मन्त्रराजं-तथा पंचशताक्षरं॥पञ्चाक्षरमादिमन्त्रं-तथाष्टाक्षरमंत्रकं॥दशोना
त्रिंशता विद्या-महामंत्रमुदाहृतं॥द्विशतं तु महादेवि-नवत्यधिकसुव्रते॥वशिष्ठरेतो ह्रिंपुरा-सहस्राक्षरमालिः

CC-0. In Public Domain. Digitization by eGangotri
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

का॥ एतन्त्यरतरं देवि कुलाचारक्रमो विधिः॥ परंब्रह्मस्वरूपञ्च नादबिन्दुकलात्मिकाः॥ संसारार्णवमध्यस्था सकलार्ण
वरूपिणी॥ श्रीगुरोः कृपया देवि संप्रदायक्रमागतं॥ लभ्यते यदि भाग्येन कोन्यो धन्यतरो भुवि॥ मनुष्यवपुराछ
न्नः शिवोसौ नात्र संशयः॥ वर्ण्णितुं नैव शक्नोमि कालिकायाः कुलक्रमं॥ वर्णं षोडशकं विद्या राज्यदा प्राणदा स्मृता
मस्मिन्सौख्यप्रदा शान्ता सा काली प्राणदायिनी॥ वैखरी वाग्भवा वत्सा दशहस्तोपगा वर्ण्णने॥ ब्रह्मविद्यास्वरूपा सा भु १९
क्तिमुक्तिफलप्रदा॥ एकोच्चारेण देवेशि वाजपेयस्य कोटयः॥ अश्वमेधसहस्राणि प्रादक्षिण्यं भुवस्तथा॥ प्रयाग
स्नानजं पुण्यं मकरस्थे दिवाकरे॥ तस्माच्छतगुणं पुण्यं कालिकाविधिमाचरन्॥ चतुराश्रमस्थस्य यत्पुण्यं क्रमेण प
रिसेवितं॥ यत्पुण्यं वर्णधर्म्मस्य तत्पुण्यं कालिकार्च्चनात्॥ काश्यादितीर्थयात्रा च सार्द्धकोटित्रयान्वितं॥ तुल्यं
तु यानि देवेशि सत्यं सत्यं न संशयः॥ लक्षजापेन देवेशि किं पुनः सिद्धिभाग्भवेत्॥ यस्याः सामर्थ्यतो देवि भु

वनानि चतुर्द्दश॥ अभवत्परमेशानि तेषां कारणरूपिणी॥ पुरश्चर्याकृता येन तेषां विद्याफलोद्भवः॥ अकृत्वा
तु पुरश्चर्यां न मंत्रफलदो भवेत्॥ ब्रह्माण्डकोटिजननी महामोक्षप्रदायिनी॥ निःसरन्ति महामन्त्राः विस्फुलिं
गा यथा प्रिये॥ अग्नेः सकाशाद्बहवो भेदा विद्याः प्रकाशिताः॥ प्रणवात्तु समुत्पन्ना परंब्रह्ममयी तु सा॥ पालनकर्त्री
रक्षिता च नान्या तु भुवनेश्वरी॥ नाना मन्त्रस्वरूपेण नानारूपेण मायया॥ मोहयन्ती जगत्सर्वं पुत्रपौत्र
प्रवर्द्धनी॥ स्त्रीपुंभावनसंसक्तं ग्रन्थितं कर्म्मसूत्रके॥ सर्व्वत्र व्यापिनी चापि ब्रह्मस्थानविवासिनी॥ सौभाग्यप्र
भवः हन्ता विश्वयोनिर्निरिनिरिता॥ चतुर्वर्गप्रयनिष्ठे यन्त्रे लोकवशकारिणी॥ सूक्ष्मा संविन्मयी देवी रूपिणी भो
ग्यदायिनी॥ महासंपत्प्रदा नित्या साक्षादक्षररूपिणी॥ षोडशाक्षररूपेण विश्वं व्याप्य व्यवस्थिता॥ नवाक्ष
री महामन्त्रा पञ्चवाष्टाक्षरी तथा॥ एकाक्षरी दशार्णा च शतमार्णा च सहस्रकं॥ एतेषु मंत्रवर्गेषु विश्वं व्याप्य व्य।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वस्थिताः॥ चतुर्वेदेषु यत्सारं तदङ्गेषु च यत्स्मृतं॥ पुराणस्मृतिसारेषु· यत्तु सारं तमं महत्॥ तत्सर्वेभ्योधिकं सारं· सारात्सा
रतरं महत्॥ नवनीतं यथा दध्नां सारोद्धृतं घृतं न वेत्॥ तदेवममृतं सारं· देवानां प्राणधारणं॥ तथा समस्तशास्त्रेषु
वेदतंत्रेषु चाप्यये॥ उद्धृत्य सर्वसारेभ्यो· ब्रह्मणा पुनियाद्धिना॥ ब्रह्मणापि वशिष्ठाय· वशिष्ठो राघवाय च॥ दत्ते सर्वा
त्मना तेन· ततो मन्वंतरे वतारिता॥ अद्धे नाद्धिधाकृत्वा· मुनिना ज्ञानदृष्टिना॥ दशोनात्रिंशताक्षर्यां· मंत्रवीर्य्यं प्रका २०
शिता॥ सोप्यसिद्धिः कृता तेन· देवीप्रत्यंगिराभिधा॥ नारदानुमते● नैव· संज्ञादेव्याद्धिधाकृता॥ निधानमिव चौरेभ्य
रक्षणीया प्रयत्नतः॥ न देयं यस्य कस्यापि· देया प्राणप्रदायिने॥ निर्मलाय प्रशान्ताय· प्राणेभ्योपि प्रियाय
च॥ ज्ञाननिष्ठाय दातव्यं· सारमेतन्महेश्वरि॥ ॥इति श्रीमहाश्रोतसिद्धिरक्षके करवीरयामलेपरातंत्रे क्रमपाद
दशसारुत्रिकायां कालिकाक्रमनिर्णयस्तंत्रं॥ ७ ॥देव्युवाच॥ नमो देवाधिदेवाय· सर्वज्ञाय कृतात्मने॥ सृष्टिस्थिः

त्यंतकर्त्रे च· सर्वव्यापि नमोस्तु ते॥ जय देव जगन्नाथ· किंचित्पृष्टुं मम प्रभो॥ मनो मे तरलं जातं· तया द्रष्टुं न चोत्सहे॥ प्र
सीद परमेशान· संशयं छेत्तुमर्हसि॥ ॥श्रीसदाशिव उवाच॥ माशंकां कुरु देवेशि· त्वदन्या नास्ति मे प्रिया॥ निःशं
कं त्वं छयात्रेवि· पृच्छस्व हृदि वाञ्छितं॥ यं यं त्वसंशयं देवि· तं तं पृच्छ यथेच्छया॥ ॥श्रीदेव्युवाच॥ नमस्तुभ्यं नमस्तुभ्यं
नमस्तुभ्यं महेश्वरः॥ चिद्रूपिणी परा देवी· कालिका त्वं गता यदा॥ कस्मात्तैव गता देव· नारदानुमते नवै॥ सर्वागमवि
त्सूरः साधकानां वरो मुनिः॥ किंनेदं चैव कानाथ· वसिष्ठोः नारदः पुरा॥ ॥श्रीसदाशिव उवाच॥ धन्यासि कृतकृत्यासि
श्रोतुं ज्ञानासि तत्त्वतः॥ यतः सूक्ष्मातिमे देन पुनः श्रोतुमतिस्तव॥ जाता परमिका बुद्धिः· नमस्ते परमेश्वरि॥ सप्तादशाक्ष
रीविद्या· या विद्या परमा कला॥ खण्डस्य खण्डिनी खण्डा· खण्डखण्डाखण्डखण्डिनी॥ खण्डचक्रगता काली· विद्या सप्तादशा
क्षरी॥ फणिरूपस्य कालस्य· अकुला विन्दुभक्षिणी॥ त्रिधा चानुरक्ता लक्ष्मी· विद्या सप्तदशी स्मृता॥ अकला कलमध्यः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्या·कलस्याथ कलाकला॥ अकलाथ रमानन्दा·सिद्धिं सप्तादशाक्षरी॥ एवस्यं एव मध्यस्थं·एवेश वंनियोजिता॥ एवली:
लावराज्ञेया·महत्सेप्तादशाक्षरी॥ कान्त गामिछान्तनानं·महाहृल्लोल हंहतं॥ एवलीलाकला कान्त मेना सप्तादशी
कला॥ अक्षराक्षरयोगेन·काली शब्देन सज्ञिता॥ योगेश्वरी पदं नाम्नि·विद्या सप्तादशाक्षरी॥ हृहहाहृदेल ली ला:
विलीनाहृदने हृसा॥ हृन्नादानापदेलीना·विद्या सप्तादशाक्षरी॥ एवं सप्तदशं वर्णं·वर्णयेयर मेश्वरि॥ क्रमसर्वो
त्तरं तीव्रं निर्गुणं परमेश्वरी॥ शतहस्यन्तु वर्णानां·नवत्यंक कीर्तितं॥ त्रिगुणैरहिता विद्या·त्रिरष्टाङ्गपरिकीर्त्तिता॥ न
वषोडश वर्णानां·भेदोनात्रैव विद्यते॥ अनया विद्यया देवि·जन्ममृत्युविरुध्यश्च॥ नारदाद्या मुनिश्रेष्ठा·योगिनः क २१
पिलादयः॥ त्रिलोकविजयी भूत्वा·स्वेच्छया विरहन्ति वै॥ अव्याहतगतिः प्राप्ता·त्रिकालज्ञो भवेत्तदा॥ श्रोणिनाक्षयु
रादेवी·हरिं शंकर विग्रहा॥ नारदेन मुनीन्द्रेण·ब्रह्माय संप्रदत्तवान्॥ हरिणा ब्रह्मणा श्चेषु·प्रयुक्तो हरमोहितः॥

धि ४

वासुदेवोपि नार्थाय·रक्षार्थं प्रददौ पुरा॥ भुक्तोपभुक्तपुष्पन्तु·शिवयोर्गं यथा भवेत्॥ तद्वन्निरक्षरं वस्तु·अक्षरैरपि संयु
ता॥ नोङ्कारं लेखयेद्देवि·साक्षाद्दुर्गेश्वरी परा॥ शापो भवति वै नूनं·मंत्रः शान्ति प्रजायते॥ विमुखी भवते काली·पापा नाम
प्रयो भवेत्॥ कर्णे कर्णे तु देवेशि·रुद्धि स्थं कुरु सर्वदा॥ गुरुवक्त्राद्विनिष्क्रान्ता·श्रोत्रमार्गा हृदि स्थिता॥ उदके लिखितं यद्वन्म
न्त्रोद्धारं तथा भवेत्॥ योगमोक्षप्रदा विद्या·पुस्तके नैव लेखयेत्॥ सम्बत्सरत्रं कुनावासं·ज्ञात्वा कर्म शुभाशुभं॥ ततो मंत्रोपदेः
ष्टव्यो·यथात्म शुभमिच्छति॥ अपरिक्षितशिष्याय·यस्तु मंत्रं प्रयच्छति॥ निरये नियतं वासो·भविष्यति सुदारुणो॥ तस्मात्
सर्वप्रयत्नेन·न प्रकाश्यं कदाचन॥ आस्तिक्य बुद्धिर्यस्यास्ति·तस्मै देवि प्रसीदति॥ शंकायां जायते हानिः शंकायां दुः
खभाजनं॥ शंकायां सिद्धिहानिः स्यान्निर्विकल्पं समाश्रयेत्॥ कर्त्तव्यं वाप्यकर्त्तव्यं·नैव तत्र विचारयेत्॥ मत्यापि विस्मु
ना सार्द्धं·ब्रह्मणा मुनिभिः सह॥ एकपात्रं गृहीत्वा तु·निर्विकल्पं यथा प्रिया॥ देवगंधर्वदैत्यादीन्·यक्षपन्नगमानवाः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सप्तधातुभिः संक्लिन्नैः मलमूत्रप्रवाहकैः॥ तेषां किं तद्विचारेण निर्विकल्पं समाश्रयेत्॥ सूर्योदये किं तमांसि तिष्ठंति भुवनोदरे॥ तथा देव्या
प्रभावेन किमाचारं विचारयेत्॥ किं वहन्ती नदी देवेशि गोपनीयं सदैव हि॥ सर्व्वसिद्धिमिदं शास्त्रं गोपनीयं प्रयत्नतः॥ प्रकटे मृत्युमा
प्नोति सिद्धिहानिः प्रजायते॥ अस्मिन् धर्मे तन्त्रे यदाचारस्तत्र धर्म्मस्तु तादृशः॥ कृतार्थस्ते न जायेत स्वर्गो वामो भगवता॥ नाधर्म्मो नैव पापा
दिजायते न क्रमेण तु॥ किञ्चिद्धर्म्मो महानेवाथि पुण्यराशिः प्रवर्द्धते॥ शम्भो सर्व्वं समुत्पन्नं यत्किञ्चिज्जगतां गतं॥ तस्मात्कुरु मसुन्दः २२
वाशा... ब्रह्मस्वरूपकं॥ सर्व्वे वेदविदो विप्राः सदाचाररताः सुव्रते॥ चांडाले स्वपचे वापि आत्मा सर्व्वत्र विद्यते॥ आत्मा ब्रह्म विजानी
हि भ्रान्तिर्ज्ञानं परित्यजेत्॥ ज्ञानमेव परं तत्वं तस्माज्ज्ञानं समाश्रयेत्॥ ज्ञानमार्गेण सकलं विकल्पं परिवर्जयेत्॥ साविकल्पो म
हान् दोषः पापमाज्ञायते ध्रुवं॥ शिवशक्तिमयं देहः रजशुक्रेण जायते॥ परं ब्रह्मणि संलीना परा वाच्या परेश्वरी॥ नीराज्यं मधुमै
रेयं द्रव्यभेदान्नवह्निहि॥ सर्व्वज्ञत्वं वरारोहे यत्न दोषो न विद्यते॥ अश्वमेधमखायज्ञे वाजिहन्त्या कथं भवेत्॥ जलं क्षीरं घृतं चैव म

धुमैरेयमेव च॥ पुष्पं तरुभवं धान्यं संभवं तक्रनिर्मितं॥ सहकारं भवं चैव विविधं बहुभेदनः॥ अज्ञानैः संस्कृतं सर्व्वं महापातककृ
द्भवेत्॥ ब्रह्महत्या सुरापानं स्वर्णस्तेयादिपातकं॥ पूजनादेव निर्व्वर्त्य निर्विकल्पः समन्त्रवित्॥ जलं जलचरं सर्व्वं घटयूर्मसमाः
नये॥ स्थापिते दिनसप्ताहे जलं जीवसमन्वितं॥ अन्नामिषं नास्ति किञ्चित् सर्व्वं क्षीरादिकं प्रिये॥ समवृक्षः समो वह्निस्तथा सु
दर्शिया वीति॥ सर्व्वभूतेषु विज्ञानं ज्ञातव्यं देशिकोत्तमैः॥ काष्ठादिमथनाद्देवि प्रकटो वह्निरुच्यते॥ तत्काष्ठं दह्यते वह्निस्तेन
ब्रह्ममयं जगत्॥ धर्म्माधर्म्मपरित्यागात् सकलेपि परत्र च॥ विण्मूत्रं स्त्रीरजो वापि यच्चास्ति सकलं प्रिये॥ विचारयेत्तत्र मू
त्रादि भ्रान्तिरेव हि कारणं॥ अन्नं ब्रह्म विजानीयात्तेन यस्य समुद्भवः॥ नानाजीवाश्रयं तत्तु पुरीषं केन दूष्यते॥ गोमूत्रप्राश
नं देवि गोमयस्यापि भक्षणं॥ प्रायश्चित्तेषु कथितं ब्रह्महत्याविमोचने॥ मलमूत्रेषु या भ्रान्तिर्द्वैषयपवनसंशयः॥ स्त्रीरजः
परमेशानि देहस्तेनैव जायते॥ कल्पितं दूषितं तेन प्राप्यते परमं पदं॥ पुरुषस्य तु वीर्यं तु बिन्दुरित्यभिधीयते॥ बिन्दुः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

~~मित्यभिधीयते॥~~ बिन्दुस्तु परमेशानि कार्य्यार्थं शिवरूपधृक्॥ शिवतत्त्वेन शास्त्रादि दूषणं नास्ति वै तदा॥ मूत्रं पवित्रं देह-
स्य कारणेन न निन्द्यते॥ ज्ञानमार्गेण सकलं निर्विकल्पस्य सुन्दरि॥ विकल्पस्य महेशानि पापजाग्जायते नरः॥ मातृ-
गर्भस्य बीजन्तु शिशुरेव न संशयः॥ निर्विकारतया यस्य रसेनाकुत्सिता भवेत्॥ तन्तु दूषणसंयुक्तं मन्यन्ते सर्वमुजे भवेत्
२३ ॥ब्रह्मानन्दमयं ज्ञानं परंब्रह्ममयो भवेत्॥ तं ज्ञात्वा परमेशानि कथयामि वरानने॥ नवांशस्तु ब्राह्मण्यं नक्षत्रेषु
त्रियेस्तथा॥ विस्यो नवैतत्त्वं मूढेण मूढस्तु परमेश्वरि॥ विचारे परमेशानि पुष्करो नैव पुष्करः॥ सबीसा न्तु विजानीसे २३
परमात्मा विनिश्चयात्॥ आकाशात्पतितं तोयं निम्नमार्गेण गच्छति॥ ग्राममध्यगतं सर्वं विष्ठामूत्रादिपूरितं॥ मृगगो-
स्वाहिमार्ज्जारखरादि रुधिरान्वितं॥ समस्तमपि देवेशि गंगायां मिलितं यदा॥ गंगामृतं न देवास्ति कालुष्यं नैव तिष्ठ-
ति॥ मलमूत्रेषु यो दोषो भ्रमरवह्निकारणं॥ पवित्रं स्त्रीरजः प्रोक्तं यतो देहं विनिःसृतं॥ रुधिरादिप्रदानेन प्राप्यते परमं

पदं॥ पुरुषस्य तु यद्बीजं बिन्दुरित्यभिधीयते॥ सर्वस्य कारणं रेतः तद्देहं केन निन्द्यते॥ भगलिंगयोः संस्पर्शात् गर्भो विनि-
ःसृत पुमान्॥ तदा तदा जन्मकाले को नस्या गुरुतल्पगः॥ पुण्यकाले विनिर्मुक्तं ज्ञानमेतच्छृणु प्रिये॥ ब्रह्माण्डकोटि-
जननी एकैवाहं स्वरूपिणी॥ भुक्त्वा नानाविधैर्बीजं क्रीडार्थं मम केवलं जगत्॥ कुलालस्य चक्रभ्रमेदेन घटाकाशं यथा घटे
दृश्यते परमेशानि आकाशं व्योम तिष्ठति॥ घटे भवति भिन्नत्वे नाकाशो भिन्नता भवेत्॥ यथा देहगतो जीवो देहनाशे
वरानने॥ व्याप्य तिष्ठति सर्वत्र तस्माद्ब्रह्मपदं भवेत्॥ एवं संविन्मयं ज्ञानं समता सर्वजन्तुषु॥ भावयेत्सर्ववर्णेषु स-
मता नात्र संशयः॥ यथा सूर्यप्रकाशेषु समत्वेन प्रवर्त्तते॥ हर्ते मेध्यापि वान्यस्य तमसं हरते क्षणात्॥ शोधयेत्सर्वमन्-
त्रादि चन्दनं नैव कर्द्दमं॥ अनया व महेशानि शान्तः सर्वमयो भवेत्॥ सिद्धिन्तु देवि विज्ञाय श्रीगुरोः कृपया प्रिये॥ ॥
इति श्रीभैरवप्रोक्तसिद्धिरहस्ये कंकरवीरस्याघोषशतन्त्रे परमार्थनिर्णयः॥ ८॥ श्रीदेव्युवाच॥ यथा संसाधयेद्देव प्रयोगा

श्री

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दीक्षां लभ्यते॥ साधकः संविभागेनः तथा कथय शङ्कर॥ ॥श्रीमहाकाल उवाच॥ शृणु देवि प्रवक्ष्यामि यथा संसिद्धिसूचकं॥ ये
न संसाधयेद्वीरो धीरो वा कुलसन्ततेः॥ स्नात्वा तु पुरश्चर्यां प्रयोगकर्त्तुमिच्छति॥ महापातककोटीनां नाशनं सम्भविष्यः
ति॥ नातः परतरं देवि कुलमार्गस्य दूषकाः॥ तस्मात्सर्व्वयत्नेन नापि प्राणान्तेनापि सर्व्वदा॥ कर्म्मणा मनसा वाचा पुरश्चरण
माचरेत्॥ वर्णलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः॥ दिवा च ब्रह्मचर्य्येण रात्रौ कुर्य्याद्यथेच्छया॥ पूजयेद्विधिना देवि मप
ञ्चकपुरस्कृतः॥ साङ्गं सपरिवारञ्च तत्र तर्पणं न कारयेत्॥ दशांशं हवनं कुर्य्याद्बिल्वपत्रैर्घृतप्लुतैः॥ छागमांसैस्त्रिमधन्तैः
दीपितैस्तुष्टिहेतवे॥ तर्पयेत्कुण्ड्या देवीं दशांशेन हवनस्य च॥ तर्पणस्य दशांशेन मार्ज्जनं समुदाहृतं॥ तद्दशांशेन वै कुर्य्या
त्कुमारीपूजनं महत्॥ कलौ वै तु गुणां कुर्य्यात् पुरश्चर्य्यान्तु साधकः॥ दीक्षां प्राप्य न कुर्य्याद्यः पुरश्चर्य्याविडम्बनं॥ आयुश्च नै २४
सनां ज्ञात्वा स्वात्मश्रेयस्तु चिन्तयेत्॥ दीक्षां प्राप्य पुरश्चर्य्यां मकृत्वा म्रियते यदि॥ ब्रह्मभूतो भवेन्नूनं शतवर्षमना

पा ४

न्तये॥ तस्मात्सर्व्वात्मना देवि पुरश्चर्य्यां समाश्रयेत्॥ चन्द्रसूर्य्योपरागे वा पुरश्चरणमुच्यते॥ दशांशं सर्व्वकर्म्माणि कारयेत्पू
र्व्वोदितं॥ ततः प्रयोगकर्म्माणि शृणु वक्ष्यामि साम्प्रतं॥ वीरदीक्षान्तशक्ताय संपूज्य विधिवत्सुरा॥ श्मशाने शिवदक्षे वा गृ
हे वा पावने स्थितः॥ दिवादित्रिविधैर्न्नित्य मभावात्सर्व्वणि पुरणी॥ सम्यग्वाग्धैर्य्यसंपन्नः कामक्रोधविवर्ज्जितः॥ शक्तिस
हायसंयुक्तो वीरसहायकोपि वा॥ सहायद्रव्यहीनो यः मोक्षाशी वनिशागमे॥ सहस्रैकं जप्त्वादौ काम्यसिद्ध्यर्थहेतवे
॥ देवीतुष्टा तु स्वाङ्कुर्नेद्वैव यथा पूर्व्वं मयोदितं॥ ततो लक्षं जपेन्मन्त्री दिवा चाहारवर्ज्जितः॥ भुक्त्वैवं भावनाशक्तः शंख्याः
यां वा तत्संख्यकं॥ गायत्र्यां तु जपेद्युग्मं न्यस्त्वा चैव षडङ्गकं॥ ततो रात्रौ जपं कुर्य्यात् यथाशक्त्याक्रमेण तु॥ दशांशेन कुण्डेत्प
श्चात्सम्यक् संसिद्धिहेतवे॥ होमान्ते कन्यकाः पूज्याः कृतसिद्धिर्भवेद्ध्रुवं॥ अथवा द्विगुणं शिष्यं यावद्वै सप्तवासरं॥ क्रूरादौ वा
ऽसमे सिद्धि होमान्ते ग्रहशान्तिकं॥ त्रिसंध्यमर्च्चयेद्रात्रौ तु एकोद्दिष्टं त्रिचतुर्द्दिनं॥ मासादिसेकतः शान्तिः शोमाद्रोगः प्रमुच्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न्॥ अष्टम्यां वा चतुर्द्दश्यां समारभ्य कुनेऽर्च्चनं॥ दशांशहोमतः सेकात् महाशान्तिर्भवेद्ध्रुवं॥ जपेत्त्र्यक्षरं मन्त्री यक्षकं त्रिशतं कुने
त्॥ होमान्ते सेकतः पश्चात् सुस्थिरश्चैव सम्पद्यात्॥ त्रिशतं त्रिशतं कृत्वा जप्त्वा चैवाक्षमेरुभिः॥ होमान्ते सेकतो जप्त्वा पुष्टिमाप्नो
ति मानवः॥ जप्त्वा चैव तु साहस्रं कुने त्र्यक्षरनामिना॥ नागाश्वगोष्ठलोकानां पुष्टिमाप्नोति सेकतः॥ निगलार्गलंय
न्त्राणि आत्मनो वा परस्य वा॥ त्रिसंध्यं वर्त्तनात् सद्यः त्रिसप्ताहं प्रजायते॥ श्मशाने शर्करां गृह्य मन्त्रेरष्टशतं जपेत्॥ अन्त्र यन्त्र २५
क्षिपेत् गौरी निर्गलो स्फाटनं भवेत्॥ नूतनं कुशस्य दण्डेन त्रिधा पिमन्त्रिनां च धनूः॥ नावाशकटयन्त्राणि स्तम्भयेत् मोच
येत् तथा॥ दूर्वांतन्तु विषस्त्रीदुःकूलं दुष्टजन्तुषु॥ वालुकां सप्तजप्तान्तु महामेघांस्तु वारयेत्॥ राजिकां सप्तजप्ता
न्तु यस्तां भूतादिभिर्न्नरः॥ नाड्ये धूतिमुद्राभ्यां कृत्वा संत्यज्यते ध्रुवं॥ ज्वरस्य तु चतुर्थकाद्यास्य सप्तजप्तोदकेन तु॥ अभ्युः
क्षणात् निवर्त्तन्ते चित्राणि पुष्पगुल्मधूपतः॥ लूतागर्द्दभविस्फोटव्याधयो विविधास्तथा॥ सप्तजप्तोदकः सेकात् यान्ति नाशं पा

द्विनाशयेत्॥ एकविंशतिवारं तु जलं चैवाभिमन्त्रितं॥ स्थावरं जङ्गमं वापि विषं याति हि नाशयेत्॥ पुष्पान्नसिद्धिसिद्धा
न्नस्मशानस्य च भस्मकं॥ सप्तजप्तान्तु नेष्टं तु मशकमोस्तं नाशयेच्च॥ महापात्रे धान्यपुञ्जे मध्यपूर्णघटे पुनः॥ स्वस्वस्थं तज
वेत्तस्य नित्यपूजारतस्य च॥ अथ कोऽपि विल्वगतां संलिख्य पटके जपेत्॥ धनदेन समं द्रव्यं नैकदाचिद्धि नश्यति॥ ग
जशाले मुक्तदामे पूजये न्यक्षज्ञानशेलेः॥ नकदाचिद्धि नश्यन्ति गजवृद्धिः प्रजायते॥ कृत्वा चनवकं कोष्ठं मध्यस्थाने कद
र्प्पकैः॥ संपूज्या स्थानं नश्यन्ति वृद्धिमायान्ति शोभनाः॥ सितगुञ्जा च सप्र्यास्या धापव्या घुवराटिकाः॥ सप्तजप्ता पुरा धार्या
श्वश्वतंगोनन्द्रायते॥ वालानां सर्पमामञ्चश्रतकेनाथ मरव्याया॥ कण्ठेपमा वृद्धियान्ति आयुषा प्रजया दृढं॥ पुष्पार्क
श्रीफलं पक्वं मरुष्याद्धेनमोदितं॥ तज्जलं सेवते नारी अपुत्रा सूयते सुतं॥ अशोकतरस्था नैव पुष्पमालाभिमन्त्रिता
यस्य संदीयते कण्ठे एकस्तु भैरवी भवेत्॥ स्वहोरा त्रोषितो भूत्वा अनुदिश्ये जपेत्तु यः॥ स्वार्थं स्वार्थं परार्थं स्वा स्वपमृ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पृथ्वीन्तुर्विनश्यति॥पुण्डरीकांम्बुनावर्त्या·कार्पासं दीपसंमुखे॥वनंजायात्तरुद्देस्येण·अञ्जनीयश्यैन्निधिं॥चतुष्पथमृदंपुत्तल·मृ
र्द्धेपञ्चविंशतिः॥जप्त्वा संक्षेपयेच्छिद्रं·वन्योनयतिदुर्जनः॥तिलत्रयस्य सिद्धार्थं·पुत्त्येकं दश मंत्रितं॥एकीकृत्य क्षिपेद्यस्तु
यदंनाक्रमते रिपुः॥फलानि वर्षिकं पञ्च·विंशाधिकशताभिधं॥भूतान्यां संक्षिपेद्यस्तु·तत्ररोगी भवेज्जनः॥नारत्वाक्ष
तसिद्धार्थसमन्त्रतेशाननं मंत्रितं॥यत्रयत्र क्षिपेन्मंत्री तत्रारोग्यं प्रवर्त्तते॥काष्ठमात्रो दकेस्थित्वा जपेत्त्यच्च शतं यदि॥वा: २६
रुणो नतथा हो मा·म्महा वृष्टिर्भवेत्क्रुवं॥शतार्द्धन्तु जपेन्मंत्री·शतार्द्धं होमयेत्स्त्रीये॥वशी कुर्य्यान्न संदेहः॥शप्तांहेन शश्ची
पति॥जप्त्वा पञ्चशतं मंत्री·शतार्द्धं होमयेत्पुनः॥पुनःपश्चाद्धनंजप्त्वा·सिद्धार्थं वाक्षतं तथा॥मस्तके काष्ठवाहो च·धृतादि:
यस्य स्नानं॥अपामार्गशतं कृत्वा ततक्षारं प्रयस्य दीयते॥दुर्जनो जायते सत्यं·प्रीतिनाशमवाप्नुयात्॥सिद्धार्थगुग्गुलुं तु
थैवम्यकीकृत्य शतत्रयं॥होमान्ते च महाप्रीतिरप्रीतिः सच्च जायते॥केमवीजशताष्टौ च·होमयेत्त्स प्रवासरं॥उन्मत्तो जायते

शीघ्रं वर्त्तुलं वा घृतान्वितं॥सप्ताहत्र निशाराज्ञौ जपेत्कृष्णासमन्वितं॥दिवा च ब्रह्मचर्य्येण·रात्रौ कुर्य्याद्यथेच्छया॥कर्थ्यासाः
स्थितु यामेस्त·युतं पञ्चशतं कुनेत्॥एकविंशद्दिने देवि·शक्यापि प्रियं हरेत्॥गुरुमुक्तनीत्यांत्यां·पूजा कुम्भे शतं नवेत
।कृत्वाग्निमधुरं सेका·नुस्वच्छीलं जनेत्स्थितं॥पिष्ठेन प्राकृतं कृत्वा·अंगुष्ठापस्तकावधिः॥छित्वा पञ्चशतं कृत्वा·त्वकुत्वांप
रिनेष्यति॥सिन्दूरमसहनेर्युक्तं·शताष्टपरिमंत्रितं॥कृत्वा कन्याकरे दत्वा·आविष्टा विष्टकं चरेत्॥राजिकाधूमजं रद्यौरं
दशधा चाभिमंत्रितं॥महारोगप्रशमनं·स्नानमात्रेन निश्चितं॥तैलं न्याथ घृतं न्वाथ·अष्टधा चाभिमंत्रितं॥पानान्ना
भिप्रदानाञ्च·प्रसूतेमुग्धमिङ्या॥शिवस्थाने घटं पूज्य·अष्टोत्तरशतं जपेत्॥दिनाहितेसु कार्य्येषु·सुरैरेवो दयं त्तते
त॥हत्वाम्बरसमादाय·कृष्णमावर्त्तलक्ष्यकं॥तथैवाद्दस्य केसरं·क्रीडते वसुधातले॥पंचविंशतिसाहस्रं·करेकृत्वा
थवाजयेत्॥जपान्ते च क्षयेत्प्राज्ञो·वागीश्वरसमो भवेत्॥लक्षार्द्ध होमयेद्धीरः·कदम्बकुसुमैर्यदा॥कुण्डाद्भुतिष्ठते श्री

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

का २

घृं वेताल: सिध्यते तदा ॥ काकिनीवीरहोमेन तुष्टा भूतपिशाचिका ॥ लक्षार्द्धहोमेन नित्यं दद्यात्स्वेकिकं ॥ कन्या
हस्तेन लं गृह्य लक्षार्द्धं तु श्मशानके ॥ जप्त्वा भूतजविघ्नाश्च वर्त्तमानं जवत्यलं ॥ नृगोलोचनकैर्गृह्य शलाक्काशतम
न्त्रितं ॥ ललाटे तिलकं कृत्वा यं पश्येत्स वशो भवेत् ॥ कुंकुमागुरुकर्प्पूरलोचनोनिम्बमिश्रितैः ॥ शतानि मंत्रितं कृत्वा
तिलकं यः करिष्यति ॥ रणे राजकुले द्यूते विवादे सजयी भवेत् ॥ सिद्धार्थकवरां चैतां घृत्यूषेकलशोदरेत् ॥ कृत्वा २७
प्रातश्चतुर्द्दस्यां संपूज्य मधुसंयुते ॥ मुखे प्रक्षिप्य जप्त्वा तु परवादे जयो भवेत् ॥ शितसपुंषिना मूलं शतारूपरिजा
पितं ॥ शिरोवेष्टके बद्धा परवादे निवारणं ॥ आचाराचारभेदेन तत्र दोषो न विद्यते ॥ निराचारापि शाचारो तस्या
देव्याः प्रभावतः ॥ विशेषं किं बहूक्तेन सारमेतद्वदाम्यहं ॥ नृचर्म्मासनं चैव कृत्वा नरपात्रे प्रपूजयेत् ॥ यथानुरूप
द्रिस्तु निर्विकल्पेन साधयेत् ॥ लाक्षारसनिभे देव हेतुनापरिपूरितैः ॥ फलं दत्वा मध्यपात्रे हेतुनापूरिते ॥ अष्टम्यां

हि १ दरि १

चाचतुर्द्दस्यां नवम्यां वा विशेषतः ॥ शिवरात्र्यां तथा पूजा निशायां परिपूजयेत् ॥ यथा स्त्रीचक्रपूजा वै तथा सर्व्वं स
माचरेत् ॥ बिन्दुचक्रत्रिकोणे वै मद्यपात्रं तु स्थापयेत् ॥ पंचकाली तु पंचारे चरुकं चैव मात्रतः ॥ नानयेद्रुतरंभ
द्रे कालिकाक्रमपूजने ॥ भाग्यं स्वर्ग्गं सुखं मोक्षं भाज्ञासिद्धिर्न चैव ध्रुवं ॥ सत्यं सत्यं महादेवि सत्यमेतद्ब्रवीम्यहं
॥ अन्यथा कुरुते यस्तु हेतुवादं कुतर्कतः ॥ परिभ्रष्टं केवलं तु न संसिद्धिमवाप्नुयात् ॥ इत्येतत्ते समाख्यातं कालि
कायाः कुलक्रमं ॥ विधानं परमं दिव्यं शास्त्रं कालीक्रमागतं ॥ गोपनीयं प्रयत्नेन न दद्याद्यस्य कस्यचित् ॥ गु
रुभक्तिरतो यो हि महाशास्त्रमयी हि सः ॥ रम्यं पुष्पफलं दृष्ट्वा वस्त्रालंकारमेव वा ॥ स्वात्मप्रिया निजव्याणि य
त्किंचिद्भुक्तिदुर्ल्लभं ॥ गुरवे प्रथमं दत्वा ततः स्वात्मनि धारयेत् ॥ गुर्व्वाग्रमक्रमावेशा पूजकाश्च प्रदापयेत् ॥ गुरु
संतुष्टमात्रेण संतुष्टा कालिकाक्रमाः ॥ येनेदं लिख्यते शास्त्रं यस्य हस्ते प्रतिष्ठति ॥ यत्र तिष्ठति तत्र पूज्यन्ते विधि

CC-0. In Public Domain. Digitization by eGangotri
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्तं १

वत्सरमेश्वरी॥ स निर्विघ्नं तु षण्मासं· यावज्जीवति वै वशी॥ पुस्तकं पूजितं येन· इदं कालीकुलक्रमं॥ सम्यक्पूजितं ते
न· कालिका कालनाशिनी॥ श्रीवृक्षस्तम्भसकलं· कालेन कलयेत्स्वयं॥ तं कालं कालिका देवि· कलयेत्सा सुशो
भने॥ न कालीसदृशो यज्ञो· न कालीसदृशं तपः॥ न कालीसदृशो धर्मो· न कालीसदृशी भुवि॥ जीवन्मुक्तः
स विज्ञेयो महायोगी पुनः स वै॥ महायोगिनं जानीहि· कालिकापथसंस्थितं॥ अहं मृत्युञ्जयो देवि· मंगलाज्ञान
तो भवं॥ कलौ विशेषतः काली· पूजिता या प्रयत्नतः॥ देवतां संस्तुतं तस्मै· वर्जितस्या न कंपिथे॥ यो ज्ञातो भैर
वो देवः श्रोता रुद्रसमो भवेत्॥ सैषैकधा च बहुधा· साधकानां हिताय च॥ नानातन्त्रप्रवाहास्तु· नानाम्नाय
त्वमागताः॥ तन्त्रभेदेन भेदा· एका शक्तिः सहस्रधा॥ मंगला च महामाया· चण्डकापालिनी शिवा॥ चामुण्डा
चर्चिका चण्डा· स्थितिस्थित्यन्तकारिणी॥ अनाख्या च महाभासा· गुह्यकाली जया परा॥ सिद्धिलक्ष्मीर्दिव्यलक्ष्मी· २८

महाप्रत्यंगिरा स्मृता॥ त्रिपुरासुन्दरी चारु· उग्रचण्डप्रकाशिनी॥ विभिन्ना बहुधा ज्ञाता· नानाभेदसमाश्रिताः॥ एका
सा बहुरूपाक्षजा नीयादिव्यचक्षुसा॥ स एव साधकश्रेष्ठः सिद्धिज्ञानस्य भाजनं॥ अनुष्ठानरतः सर्वं· सिद्धिभागी भवे
द्ध्रुवं॥ ६१६॥ ॥ इति श्रीभैरवश्रोतसि शिरश्छेदे महाकरवीरयोगे परातन्त्रे कालीकुलक्रमः समाप्तः॥ ८ ॥ ॥
ख्रौं स्क्रौं श्रीं फ्रीं॥ पूर्वायाः॥ क्रीं ३ हूं २ ह्रीं २ दक्षिणे कालिके क्रीं ३ हूं २ ह्रीं २ स्वाहा॥ दक्षिणायाः॥ नमो भगवत्यै कुब्जिका २९
यै ह्रां ह्रीं ह्रूं अघोरमुखे छ्रां छ्रीं किणि किणि विच्चे॥ पश्चिमायाः॥ ॐ फ्रें सिद्धिकरालि ह्रीं छ्रीं हूं स्त्रीं
फ्रें नमः स्वाहा॥ उत्तरायाः॥ स्हौं स्हौं स्हौं॥ ऊर्ध्वायाः॥ ॐ ह्रीं स्त्रीं हूं फट्॥ अधायाः॥ इति षडाम्नायमन्त्राः॥ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal